अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

चतुर्विंशे वर्षे प्रथमोऽङ्कः

१५ जनवरी, २००२

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

सहसम्पादकः

अभिनव शुक्लः, एम०ए०

देववाणी-परिषद्, दिल्ली

६, वाणी–विहारः, नयी दिल्ली–११००५९

(भारतम्)

अर्वाचीनसंस्कृतम् (२४/१)
१५ जनवरी, २००२ ई०

विषयसूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्		१
२. श्रद्धाञ्जलयः	डा० रमाकान्त शुक्लः	२
३. श्रीनीलकण्ठस्तवः	विद्वान् एच०वी० नागराजरावः	३-५
४. नव्यं वर्षम्	डा० शम्भुनाथ आचार्यः	५
५. गुरुचरणौ शरणम्	ज्ञानोपाह्वोऽवस्थी बच्चूलालः	६
६. विश्वसूत्रधारः	त्रिपाठी डा० भास्कराचार्यः	७
७. विधेर्होमो निषेधानले	प्रो० रेवाप्रसाद द्विवेदी	८-९
८. पत्रद्वयम्	प्रो० रेवाप्रसाद द्विवेदी	१०
९. नरमेधः	डा० मधुसूदन पेन्ना	११-१६
१०. संसद्भवनोपर्यातङ्कवादाक्रमणम्	प्रा० हरिश्चन्द्र रेणापुरकरः	१७-२४
११. पाणिपञ्चाशत्	बालकविः श्रीसुन्दरराजः	२५-३०
१२. पुस्तक-परिचयः	अभिनवः शुक्लः	३०
१३. सूर्योपाख्यानम्	श्रीसुन्दरराजः	३१-४७
१४. ऋतुमञ्जरी	श्रीसुन्दरराजः	४८-५७
१५. संस्कृतिः (समस्यापूर्तिः)	श्रीसुन्दरराजः	५८-५९
१६. भारतं वन्दनीयं भवेत्सर्वदा	श्रीकान्त मिश्रः	६०
१७. सुपात्रे सतां धीमतां पक्षपातः	परमानन्द झा	६१
१८. विज्ञापनम्	दिल्ली संस्कृत अकादमी	६२
१९. किं कुर्यात्?	डा० रमाकान्त शुक्लः	६३-६४
२०. डा० वर्णेकरमहोदयानां शिवराजनिष्ठसाहित्ये राष्ट्रियविचाराः	प्रा० सौ० ऊर्मिला अराणके	६५-७२
२१. किं कुर्युः संस्कृतज्ञाः?	जग औतार शर्मा	७३-७४
२२. देववाणी-परिषद्वार्ता	अभिनवः शुक्लः	७५
२३. संस्कृत-जगद्वार्ता	अभिनवः शुक्लः	७६-७९
२४. भवतां पत्रम्	प्रा० हरिश्चन्द्र रेणापुरकरः	८०
२५. चित्राणि		८१-८२

अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

२५-२-२००२ ई० —रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)

सम्पादकीयम्

अर्वाचीनसंस्कृतमनेनाङ्केन चतुर्विंशं वर्षं प्रविशति। बह्वो: कालात्पूर्वं विदुषा एच०वि० नागराजरावमहाभागेन 'श्रीनीलकण्ठस्तव:'इत्येतन्नाम्नी स्तुतिरस्मत्पार्श्वे प्रहितासीत्, सास्मिन्नङ्के प्रकाश्यते। शिवरात्र्यवसरेऽस्या: पाठेन मुदमाप्नुवन्त्वास्तिका: पाठका:। श्रीनागराजरावस्य अमेरिकाप्रवासस्य संस्मरणान्यद्यत्वे 'सुधर्मा' दैनिकसंस्कृतपत्रिकायां प्रकाश्यन्ते। अस्य महानुभावस्य अर्वाचीनसंस्कृते प्रथमप्रविष्टिरभिनन्द्यते। 'गुरुचरणौ शरण' मित्यत्र आचार्यबच्चूलालावस्थिमहाभागै: स्वगुरो: स्तुति: कृता। तेषां गुरव: सन्ति--जगद्गुरुश्रीनिश्चलानन्दस्वामिन:। त एव अनया स्तुत्या स्तुता:। किन्तु कश्चिदपि भक्त: स्वसद्गुरुमनया स्तुत्या स्तोतुं क्षम:।

लोककण्टकभूतोऽयमातंकवादो यथा स्वच्छन्दं लोकान् व्यापादयति, यथा च भवनानि पातयति, यथा च विधानसभाभवन-संसद्भवन-सूचनाकेन्द्रेषु आक्रमणं करोति, यथा च पत्रकारानपहृत्य व्यापादयति, यथा च नक्तंदिवमकारणाविष्कृतवैरदारुण: सन् अवाच्यान्यकल्प्यानि निन्द्यानि कृत्याण्याचरति तत्सर्वेषामेव साक्षात्कृतमस्ति । ११-९-२००१ तारिकायां प्रो० रेवाप्रसादद्विवेदिमहाभागा अमेरिकादेशे एवासन्। तैर्विश्वव्यापारकेन्द्रस्थभवनद्वयविध्वंसे 'विधेर्होमो निषेधानले' इत्यत्र षोडशपद्यै: स्वव्यथोपनिबद्धा। डॉ० मधुसूदनपेन्नामहाभागैरपि अमुं विषयमधिकृत्य 'नरमेध:' इति काव्यं रचितम्। १३-१२-२००१ तारिकायाम् भारतस्य संसद्भवनोपरि यदातङ्कवादिनामाक्रमणं सञ्जातं तदवलम्ब्य प्रा० हरिश्चन्द्ररेणापुरकरैरेकपञ्चाशत्पद्यै: 'संसद्भवनोपर्यातङ्कवादाक्रमणम्' इति शीर्षकेण रचना प्रणीता।

श्रीसुन्दरराजमहाभागानां दीर्घरचनाचतुष्टयमस्मिन्नङ्के प्रकाश्यते। 'पाणिपञ्चाशत्' एतेषां बाल्ये प्रणीता रचनास्ति शेषा विगतवर्षे प्रणीता: सन्ति। श्रीकान्तमिश्रैर्भारतस्य प्रतिष्ठा काम्यते। श्रीपरमानन्दझा अद्यत्वे विद्यालय-साक्षात्कारेषु योग्यतमानां दुर्दशां सव्यङ्ग्यं निर्दिशति। 'किं कुर्यात्' इतीयं रचना मया श्री ला.ब.शा.रा.सं. विद्यापीठेनायोजिते कविसमवाये १६.२.२००२ तारिकायां पठिता यत्र विविधघटनाप्रसङ्गेषु वैवश्यव्यञ्जकानि मुक्तकानि संकलितानि सन्ति । प्रा० सौ० ऊर्मिला अराणके-महाभागाया: सन्धि विरहिते संस्कृते निबद्धे लेखे डॉ० श्रीधरभास्करवर्णेकराणां रचनात्रये समागता राष्ट्रिया विचारा: समुन्मीलिता: सन्ति। आचार्यजगऔतारशर्मभि: संस्कृतज्ञा: किमपि साथर्कं प्रयासं कर्तुं प्रचोदिता:। पत्रचतुष्टये डॉ० शम्भुनाथआचार्यमहाभागानां नववर्षशुभेच्छा:, प्रा० हरिश्चन्द्ररेणापुरकराणां नवरचनासूचनं किञ्च प्रो० रेवाप्रसादद्विवेदिनां सारस्वततप:संसूचनं द्योत्यते। देववाणी-परिषद्वार्तासु संस्कृतजगद्वार्तासु च अभिनव: शुक्ल प्रमुखवृत्तानि ददाति।

(रमाकान्त शुक्ल:)
प्रधानसम्पादक:

दिनांक: २५-२-२००२
आर-६ वाणी विहार:, नयी दिल्ली-११००५९

श्रद्धाञ्जलयः

(1) २४.१०.२००१ तारिकायां मेरठनगरे साहित्यभण्डारस्य संस्थापकः पं.रतिरामशास्त्री ब्रह्मलीनोऽभवत् । श्रीशास्त्रिणा शतशः संस्कृग्रन्थानामल्पमूल्यसंस्करणानां प्रकाशनेन देववाण्या या वरिवस्या कृता सा सुचिरं स्मरणीया स्थास्यति ।

(2) ७.६.१९२९ तारिकायां जयपुरनगरं निकषा 'हणूतिया' ग्रामे समुत्पन्नः डॉ० मण्डनमिश्रः १५.११.२००१ तारिकायां जयपुरे स्वान्तिमं श्वासमगृह्णात्। तस्यान्त्येष्टिः दिल्ल्यां निगमबोधतीर्थे १६.११.२००१ तारिकायामभूत्। डॉ० मण्डनमिश्रमहाभागस्य निधनेन संस्कृतजगतोऽपूरणीया क्षतिर्जाता। संस्कृतप्रचारप्रसारकर्ता, अनेकस्वायत्तसेविसंस्थानां सञ्चालकः, श्री लालबहादुर- शास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य संस्थापकः आद्यः कुलपतिः, राष्ट्रियसंस्कृतसंस्थानस्य निदेशकः, महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानस्य सचिवः, राजस्थानसंस्कृताकादम्या अध्यक्षः, वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य कुलपतिः, राजस्थानसंस्कृतविश्वविद्यालयस्याद्यः कुलपतिः, मीमांसाशास्त्रस्य गंभीरो विद्वान्, अनेकग्रन्थानां कर्ता सम्पादकश्च, राष्ट्रपतिपुरस्कृतः संस्कृतपण्डितः, पद्मश्रीः, देववाणीरत्नं डॉ० मिश्रः देववाणी-परिषदः समायोजितेषु अनेकेषु कार्यक्रमेषु सुलभः सन् स्वोद्बोधनैः संस्कृतजगति स्फूर्तिं सञ्चारयामास । डॉ० मिश्रमहाभागः देववाणी-परिषद आजीवनसदस्य आसीत्। डॉ० मिश्रमहाभागस्य नम्रता, निर्णयग्रहणशीलता गुणग्रहणशीलता च तस्य प्रमुखेषु गुणेषु सदैव स्मरणीयतां यास्यन्ति।

(3) महाराष्ट्रस्य सतारानगरे १७.३.१९०९ तारिकायां समुत्पन्नः प्रसिद्धः प्राच्य-विद्याविद्वान् प्रो० रामचन्द्रनारायणदाण्डेकरः पुण्यनगरे (पुणे) ११.१२.२००१ तारिकायां दिवंगतः। हायलेडबर्ग विश्वविद्यालयतः लब्ध - एम.ए.पीएच.डी. - शिक्षाशोधोपाधिः प्रो. दाण्डेकरः 'Der Vedische Mensch (वैदिकमानव) - ज्ञानदीपिका- ए हिस्ट्री आफ गुप्ताज़- प्रोग्रेस ऑफ इण्डिक स्टडीज़- रसरत्नप्रदीपिका- वैदिक बिब्लियोग्राफी- न्यू लाइट ऑन वैदिक माइथोलॉजी- श्रौतकोष- क्रिटिकल एडीशन ऑफ दी महाभारत- सुभाषितावली- प्रभृतिग्रन्थानां लेखक/सम्पादकत्वेन, फर्ग्युसन कालेज - संस्कृताचार्यत्वेन, भण्डारकरप्राच्यविद्यासंस्थानस्य (B.O.R.I.) मानदसचिवत्वेन, अ.भा.प्राच्यविद्यासम्मेलनस्य (A.I.O.C.) महासचिवत्वमहाध्यक्षत्त्वाभ्यां, पुणे वि.वि. प्रगतसंस्कृताध्ययनकेन्द्रनिदेशकत्वेन, विश्वसंस्कृतसम्मेलनस्याध्यक्षत्वेन तथा आजीवनं प्राच्यविद्याया अंग्रेजी-जर्मन-संस्कृतभाषा माध्यमेन प्रमुखप्रवक्तृत्वेन संस्कृतस्य प्राच्यविद्यायाश्च सपर्यां कृत्वा सम्पूर्णेऽपि विद्वज्जगति लब्धप्रतिष्ठो विद्वानासीत् । तस्मै भारतसर्वकारस्य 'पद्मभूषण' सम्मानः किञ्च असमशासनस्य 'श्रीमन्त शंकरदेव-सम्मानः' प्रादीयाताम् । प्रो. दाण्डेकरस्य निधनेन प्राच्यविद्याजगति या रिक्तता जाता तस्याः पूर्तिर्दुष्करास्ते ।

श्री रतिरामशास्त्रिणे डॉ. मण्डनमिश्राय प्रो. दाण्डेकराय च देववाणी-परिषत्पक्षतः अर्वाचीनसंस्कृतस्य पक्षतश्च श्रद्धाञ्जलयः सादरं समर्प्यन्ते ।

—रमाकान्त शुक्लः, महासचिवः, देववाणी-परिषद् दिल्ली, नयी दिल्ली-५९

विदुषा नागराजेन रचितः

श्रीनीलकण्ठस्तवः

–एच्० वी० नागराजराव्
प्राच्यविद्यासंशोधनालयः,
मैसूरु (कर्णाटकराज्यम्)–५७०००५

भजामि करुणालयं वरुणवासवादिस्तुतं
समस्तजगदावलीकरणसंहृतिक्रीडनम् ।
नगेन्द्रगृहमद्वयं विमलपन्नगेन्द्रोज्ज्वलं
मृगाङ्कपरिभूषितं दहनभूषितं श्रीशिवम् ॥१॥

प्रभो शिव सदा मम प्रयततां मनोभृङ्गक-
स्त्वदीयपदपङ्कजं विमलेव संसेवितुम् ।
कदापि दयया तव प्रकृतिचञ्चलोऽप्येषकः
स्थिरां व्रजतु वृत्तिमप्यतुलमाधुरीकर्षितः ॥२॥

करोतु हृदि नर्तनं सपदि नीलकण्ठो मम
प्रपञ्चमभिरञ्जयन् विपुललीलया रम्यया ।
ध्वनन्तु गगनेऽम्बुदा मधुरतालसन्दायिनः
प्रनृत्यतु च पार्वती प्रकटहावभावा भृशम् ॥३॥

स्तवीतु रसना ममामृतसमानवाचा तव
प्रभावमखिलाश्रयं निगमवाक्यवर्ण्यं शिव ।
ध्वनिं रसमलङ्कृतीरुचिततां च गीर्वक्रतां
स्वयं प्रदिश मे विभो न मयि कापि शक्तिः स्फुटा ॥४॥

शुभप्रतिभयान्विताः विपुलशब्दराशिक्षमाः
महाकविपदोज्ज्वला विदधतु स्तवान् सुन्दरान् ।
अहं तु न तथाविधः त्वयि महेश भक्तिस्तु या
तनोति ननु सा गुणान् इति दृढा मदीया मतिः ॥५॥

मनो मम विभोऽधुना प्रकटदर्पसर्पो ध्रुवं
समुद्गिरति सर्वदा गरलमेव निन्दास्पदम् ।
न वेद्मि कथमेषकः परिनियन्त्रणीयः खलः
तमद्य दमयोद्धतं झटिति नीलकण्ठ स्वयम् ॥६॥

जडोऽस्मि हतधीरहं प्रकटपापपङ्काविलः
दशन्ति मम चेतनां षडरिरूपकाः कीटकाः ।
विनाश्य सकलानमून् अवतु मां भवान् प्रेमवान्
यतो मम भवेन्मनो भवति भावबद्धं शिव ॥७॥

विनैव यदि निद्रया शिवनिशासु जागर्ति ना
सुरम्यमभिषेचनं यदि करोति लिङ्गस्य च ।
शिवं च यदि पूजयेद् विमलबिल्वपत्रैरपि
ददाति विभुरव्ययं सपदि नीलकण्ठः पदम् ॥८॥

भवन्ति कतिचित् सुराः पशुवपादिभक्षोत्सुकाः
भवन्ति च परे पुनर्गजहयादियात्रोत्सुकाः ।
वयं न धनिकाः, कथं जगति तर्पयामस्त्वमून्
शिवं सलिलधारया सुलभया वशीकुर्महे ॥९॥

भजन्ति तव कामिनीं प्रकृतिपूजकाः केचन
स्तुवन्ति तव वा सुतं कतिपये गणेशाख्यया ।
तवैव च शरं जना हरिरिति ब्रुवन्त्यादरात्
समस्तदिविषन्नुतिः स्तुतिरिहास्ति ते सर्वथा ॥१०॥

नगाधिपतिरेव ते श्वशुर एष यक्षाधिपः
सखा तव पुनर्धनुस्तव च मेरुरित्युच्यते ।
श्मशानमधितिष्ठसि प्रकुरुषे च भिक्षाटनं
कथं समधिगम्यतां तव नरेण लीलाद्भुता ॥११॥

विषं निगिरसि क्षणात् सकलविश्वरक्षोत्सुकः
तदेव विनिहंसि च प्रलयताण्डवं दर्शयन् ।
हिमांशुमपि धारयस्युरगसंहतिं च प्रभो
न वेद्मि हृदयं तव क्षितिधरेशपुत्र्याः पते ॥१२॥

वदन्ति निगमास्तव प्रकटरूपमुग्रं तथा
तवेषुमपि मन्युमप्युपगृणन्ति हेतीरपि ।
तथापि शिव भासि नः करुणया सदा पूरितः
सुमङ्गलतनुस्तथा श्रितजनैकरक्षापरः ॥१३॥

समस्तभुवनं वपुः शिव तवेति निश्चिन्वते
तथापि गजचर्म ते वसनमाहुरित्यद्भुतम् ।
कथं नु कलयामहे वसनकं परब्रह्मणः
विमूढजनतां प्रति प्रकृतमेतदित्यूह्यते ॥१४॥

विनाशय सदा मम प्रकृतिसम्भवामज्ञतां
निवारय रसादिषु प्रखरमिन्द्रियाणां गणम् ।
प्रवर्तय मदीयहृत् तव पदाम्बुजे धूर्जटे
न मेऽस्ति शरणान्तरं करुणयैव मामुद्धर ॥१५॥

सदापि रसना मम प्रवदतूच्चकैर्नाम ते
मदीयचरणौ सदाशिव शिवालयं गच्छताम् ।
करौ वितनुतां सदाप्यपचितिं मदीयौ तव
मदीयनयने शुभां हर तवाकृतिं पश्यताम् ॥१६॥

इति श्रीनागराजेन विदुषा रचितः शुभः ।
नीलकण्ठस्तवो भक्त्या भूलोकेऽयं विराजताम् ॥

□□□

नव्यं वर्षम्

—डॉ० शम्भुनाथ आचार्यः
पूर्व प्राचार्यः, बद्री विशाल महाविद्यालयः
छक्कालाल स्ट्रीट, फर्रुखाबाद

वर्षं नव्यमिदं भूयात्, खिष्टीयं कविपुङ्गव ।
श्रेयसे ते मुदे चपि, रमाकान्त सुहृन्मम ॥

नूनं विजयतां चैतत्, भारतं ते ह्यनारतम् ।
युद्धेऽस्मिन् पाकिभिर्नद्धे, मधोनस्त्रिदिवं यथा ॥

गुरुचरणौ शरणम्

ज्ञानोपाख्योऽवस्थी बच्चूलालः

गुरुचरणौ शरणम्
परमेश्वरो भवति कर्ता चेद्
गुरुचरणौ करणम्
गुरुचरणौ शरणम् ।।

कणे कणे जनिलययोर्धारा
देह एव जीवातोः कारा
क्षणे-क्षणे मरणाद् भयमास्ते
क्वचिन्नास्ति निर्वरणम्
गुरुचरणौ चरणम् ।।

संसारः सागर इति महितः
यतो गरेण समन्तात् सहितः
हन्त तथापि न जीव उदास्ते
ततः कुतो निस्तरणम्
गुरुचरणौ शरणम् ।।

सुकृती नैव न वा विज्ञानी
अज्ञः सन्नपि पण्डितमानी
सत्यमसत्यमसत्यं सत्यं
संकलयति संवरणम्
गुरुचरणौ शरणम्

इतः प्रोक्षणी ततः प्रणीता
वेदी परिस्तृता सन्नीता
यागधूममार्गेण स्वरयनम्
पुनस्ततः संसरणम्
गुरुचरणौ शरणम् ।।

आर्चायां कस्याप्यभिमानः
स्तब्धः कोऽपि कृतस्तुतिगानः
नृपप्रसादमवाप्य च केचिद्
मन्यन्ते निर्वरणम्
मन्यन्ते निर्वरणम्
मम बत करुणाकरौ नितान्तं
गुरुचरणौ शरणम् ।।

विश्व-सूत्रधारः

त्रिपाठी भास्कराचार्यः, भोपाल (म.प्र.)

अन्तरिक्षतः संप्रजायते नवला विमला कान्तिरियम् ।
काचिदवतरति दिव्यसुन्दरी मनसि जायते भ्रान्तिरियम् ॥1॥

ऊषा स्वर्णिम-रश्मिरञ्जिता लक्ष्मीरिव लक्षिता पुरः ।
तस्याः श्वासः सुरभिसमीरः स्पन्दितवान् प्राणिनामुरः ॥2॥

तर्पयते खलु नयनं वदनं संहननञ्च समीरझरी ।
मन्दं मन्दं मन्दाकिन्यां तरति निरावरणेव तरी ॥3॥

सूर्यागमनात् प्रागवतीर्णः समुत्सवोऽयं नभस्तले ।
भूमितले वृक्षे वृक्षे सिन्धौ नद्यां कासारजले ॥4॥

जागरगीतं विविधशकुन्तैरहह तन्यते नित्यनवम् ।
कल्ये कल्ये मूर्च्छ मूर्च्छ चिनु चिन्विति वा वादित्ररवम् ॥5॥

अन्तरिक्षतः संप्रजायते .... ॥6॥

वातावरणं सुरभिपावनं सञ्जायते दिशः परितः ।
सिन्दूरारुणिमा च शनैरूषायाः सीमन्ते भरितः ॥7॥

नित्यं प्रातर्जातजागराः पावनतम- वातावरणे ।
देवं नरा निरामयकामाः प्रत्युदगच्छन् सञ्चरणे ॥8॥

अर्यमणं पूषणमहिमांशुं सहस्रांशुमब्जिनीपतिम् ।
मार्तण्डं भास्करमहस्करं तिग्मांशुं भूगोलगतिम् ॥9॥

आदित्यं सूर्यं खद्योतं रविं दिनमणिं दिवाकरम् ।
छायापतिमर्कं हेलिं मिहिरं विभाकरं प्रभाकरम् ॥10॥

अन्तरिक्षतः संप्रजायते .... ॥11॥

हंसं सप्ताश्वं विरोचनं प्रद्योतनं चित्रभानुम् ।
लोकलोचनं मित्रं तपनं तरणिं विकर्त्तनं भानुम् ॥12॥

विश्वसूत्रधारं सवितारं नभोरङ्गमञ्चे दृष्ट्वा ।
यो नामयति शिरः सकृदपि किं तस्य देवमन्यं नत्वा ॥13॥

प्रायः पञ्चार्बुदवर्षेभ्यः सृष्टिं चालयते सविता ।
ब्रह्मा सन् रचयति विश्वं विष्णुः सोऽयं तत्पालयिता ॥14॥

आयाते प्रलयावसरे रुद्रः कलयन् गगनं निलयम् ।
ज्वालयते जगतीं प्रवेल्लयन् कालाग्निज्वालावलयम् ॥15॥

अन्तरिक्षतः संप्रजायते .... ॥17॥

विधेर्होमो निषेधानले

(2001 सेप्टेम्बरमसासस्यैकादशं दिनमधिकृत्य)

रेवाप्रसादस्य द्विवेदिनः

अद्यास्ते कलुषीकृतं बत मुखं पुंसा स्वकीयं स्वयं
सृष्टा हाऽद्य करैः स्वकैर्निजमुखे कालाञ्जनानां ततिः ।
यन्मानुष्यकमीयुषा वपुरिदं प्रध्वंस एवाश्रितः
स्वं ध्वंसं प्रतिपद्य सार्धममुना संघेन पुंसां हहा ॥1॥

यद् वै भूस्तन वायुयानतलतः पुंभिः परीतोदरं
हत्वा किञ्चन वायुयानयुगलं नीतं नवार्कं पुरम् ।
तत्राप्युच्चतमे गृहद्वय इदं संघट्य वह्नेर्महा-
भोगे वर्ष्मणि पातिताश्च मनुजास्तत्रैव कार्ये रताः ॥2॥

यद् वै मानवहातनोपनगरे पुंजातिकीर्त्तिध्वज-
प्रख्यातं व्यवसायकेन्द्रभवनद्वन्द्वं कृतं भस्मसात् ।
अस्यार्थः खलु कः, स एष सुमहान् निर्माणकाये विना-
शस्याघात उतास्ति कश्चन विधेर्होमो निषेधानले ॥3॥

यो वै भूमितले व्यधायि सुमहान् गर्तः शतैः सागरै-
स्तन्नाम्ना प्रथितश्च यः खलु जलैः क्षारैः समाप्लावितः ।
तस्याधारमहीं निखाय विवराकाशात् ततो धावितुं
याने/कारे-भ्यो विदधेऽत्र येन सरणिस्तस्मै त्वसौ निर्ऋतिः ॥4॥

मृत्युं मारयतेऽत्र कः, न खलु यस्तस्माद् बिभेत्येषकः,
तस्मै स्वं खलु यः प्रयच्छति भयं त्यक्त्वा स वै तन्मृतिः ।
मृत्युं मारयते तु यः शिव इति ख्यातः परेषां कृते
स ह्येवात्ति हलाहलं च जगतीं त्रातुं स एव प्रभुः ॥5॥

रे रे मानुषपञ्जरेऽद्य कृतवाँस्त्वं स्वं निवासं यदि
त्वं त्वय्येव निवासमेषि परम्, आस्त्वं नासि तत्त्वं परम् ।
यत् तत्त्वं परमायते भवति तन्मङ्गल्यमेव प्रियं
सौन्दर्येण परिप्लुतं, भवसि किं मृत्यो! त्वमेतादृशः ॥6॥

येनेन्दीवरकाननेऽस्ति दहनैरङ्गारकैर्वर्षितं
सस्याङ्कुरनिरन्तरेषु च दृढे क्षत्रेषु दुर्दूषितम् ।
तेनैवाद्य हहार्धलक्ष-गणनातीतैर्नरैः पूरितं
सद्मद्वन्द्वमिदं करालहृदयेनेत्थं प्रचूर्णीकृतम् ॥7॥

तादृंश्येव पुनश्च काममुपदीचर्कर्त्तु वेश्मान्यथो
तादृश्यो हि च तत्र सौलभजुषोऽप्यद्धाऽऽदधीरन् श्रियः ।

किन्त्वेषोद्य कथं नु पूर्त्तिमयिता गर्त्तो नृणां निर्ममै-
र्होमैर्यस्तु कृतः कृतान्तपरुषै रक्षोऽग्रजातैर्नरैः ॥8॥

पित्रोर्येन वियोजिता शिशुशती दुग्धानना, वल्लभा-
साहस्त्रीव कषायिता प्रणयिनां प्रीत्या क्षणार्धेन वै ।
तेनाश्रूणि समुद्रपूरण-लसद्वेगानि मुञ्चत्स्वहो
नृणामेव कुलेषु धिक् किमधुना नो दृक्तटी धीयते ॥9॥

नृत्यन्त्यद्य न भूस्तनाऽभ्रकुहरे किं वायुयानान्यहो
घोषैर्यानि दिशां गणे प्रजनयन्त्याकम्पनां भीषया ।
तन्निर्माणधुरं सियाटलमही कामं दधात्यञ्जसा
तद्विध्वंसविरामधूस्तु हहहा धिक् कान्दिशीकायते ॥10॥

भ्राष्ट्राणामयुतं यदा नरमहीकुक्षौ प्रदग्धायते
किं मूल्यं तु तदान्धसामपि शती जागर्त्ति चेन्मानुषे ।
न्यक्कारैरियमद्य मानवमही सांवर्त्तकैराचिता
ज्वालावर्षिभिरम्बुदैरिव रटत्कारोल्वणैः सर्वशः ॥11॥

येनानाशि सहस्त्रयुग्मशरदः प्रत्नाऽऽकृतिर्मारवे
स्वैरेवाग्रजबन्धुभिर्विरचिता बुद्धस्य गन्धारगा ।
तेनैवाद्य विनाशिताऽत्र धिगहो पुंसां विसंख्या तति-
र्नान्येनेदृश - तप्तलौहहृदयः को वा परः स्याद् भुवि ॥12॥

किं दुर्योधन एव संप्रति पुनः प्रादुर्बभूवात्मनः
सर्वो येन यमानने कुमतिना बन्धुव्रजो वेशितः ।
यद्वैषोऽस्ति महाँस्ततोऽपि न स मुखं मृत्योः करालं पुराऽ
पूर्वं वीक्षितवान्, असौ तु तदिदं पश्यँस्तदेवाऽविशत् ॥13॥

या वै मृत्युमुखे बभूव सुदृढा दंष्ट्रावली साऽप्यसौ
नूनं साहसिकेन तेन शिरसो घातेन वित्रोटिता ।
तस्मादेव तु हन्त हन्त सहसा सार्धं सहस्त्रं जनाः
संवेशाय सुखाय लब्धुमशकँस्तत्रावकाशं क्षणात् ॥14॥

धर्मं रक्षितुमुद्यता वयमिदं सर्वं प्रकुर्मस्ततो
नो पापस्य कणोऽपि नः स्पृशति वै सर्वे वयं धार्मिकाः ।
श्रद्धैषाऽपि न वः प्रसिद्ध्यति न वै व्याघ्री गवां निश्छलां
वृत्तिं पालयितु कृशाङ्गलतिकानामप्यहो निश्छला ॥15॥

हस्ते यो लगुडं बिभर्ति सुदृढैरामुष्टिकैः साहसी
स ह्येवावनिमण्डलश्रियमपि प्रोन्मथ्य भुङ्क्ते कृती ।
एषा यस्य मतिस्ततो नृशुनकात् संबिभ्यदप्यास्त्रपो-
ज्जासैकव्रतिनां वरः प्रभुरसौ जागर्ति तस्मै न नौ/किम् ॥16॥

पत्रद्वयम्

श्रीः

28, महामनःपुरी, वाराणसी-5
13.02.2002

शुक्लाः श्रीरमाकान्ताः, विजयन्ते !

अधिदिल्लि कस्याञ्चन एकवर्षप्राचीनायां यात्रायां जनेनानेन सुगतप्रतिमा-ध्वंसनमधिकृत्य कतिपये श्लोका अत्रभवद्भ्यः प्रादायिषत। तानधिकृत्य जिज्ञास्यते मुद्रिता वा नवेति। कृपयोत्तरेण सैषा शमनीया।

अत्र भवद्भिर्विज्ञेयं यज्जनस्यास्य स्वातन्त्र्यसंभवमितः पूर्वं मईमासे (2001) सहिन्द्यनुवादं मुद्रितचरम्। तत्र त्रयस्त्रिंशदिदानीं सर्गाः, यत्र पुरस्कारचतुष्टयी लब्धा तत्रासन् केवलाः 1-28 सर्गाः। साम्प्रतं षडन्येऽपि सर्गा योजिता, अष्टाविंशं सर्गं सप्तविंशे त्रयस्त्रिंशे च सर्गे योजयित्वा, नवीनञ्चैकं सर्गं विरच्य। अन्यदप्यमरीकावर्णनात्मकं श्लीलाश्लीलचरित्रचित्रात्मकं पद्यबन्धनैव (500 पद्यप्रायेण) पूरितं काव्यम्।

अन्यदपि विज्ञेयमत्रभवद्भिर्यज्जनेनानेन संपूर्णमवि कालिदाससाहित्यं स्वाभिमतपाठसहितं पाण्डुग्रन्थात्मना स्वकीयैरेवैवंविधैर्नागराक्षरैर्विलिख्य रक्षितं कालिदाससंस्थाने। तत्र मेघदूतं ब्राह्मी-लिप्यापि विलिखितम् अशोककालिक्या।

अथ स्वस्ति भवतां शुभानुध्यायी
काश्यपो द्विवेदी रेवाप्रसादः सनातनः

श्रीः

13.02.2002 28, महामनःपुरी, वाराणसी-5

प्रियोत्तमेभ्यः शुक्लेभ्यः स्वस्ति !

प्रेषितमद्य वै
प्रापि साङ्क्त्रयी यत्र मुद्रितः सुगतो मम
अन्योऽप्येकोऽस्ति सम्प्राप्तस्तदग्रेजनुङ्कः।
एतदर्थं शतं धन्यवादानूरीकरोतु नः।
अथान्यापि च पद्यानां षोडशी प्रेष्यते मया,
-'एकादशेऽह्नि विध्वंसः सेप्टेम्बरगते'श्रितः।
जन एष तदानीं वै तत्रैवासीन्नवार्कतः
पार्श्व एव स्थिते ग्रामराज एक्टनसंज्ञके।
आङ्ग्लभाषानुवादो यस्तं विहायाविहाय वा
मुद्रणोयाररीकुर्युश्चित्तद्रव- मिमं बुधाः।।

-रेवाप्रसादस्य द्विवेदस्य

नरमेधः

(११ सेप्तेंबर २००१)

–डॉ० मधुसूदन पेन्ना
कालिदास संस्कृत विश्वविद्यालयः ,
रामटेक, महाराष्ट्रम्

क्रीस्तोः परं वर्षसहस्त्रयुग्मे
गते कलेः पूर्णनवावतारे ।
सेप्तेंबराख्ये मलिने हि मासे
हन्ता स्वजातेर्मनुजो बभूव ॥१॥

अमेरिकादेश-शिखायमानं
न्यूयार्कनामास्ति पुरं प्रसिद्धम् ।
तत्रास्ति विश्वे प्रथितं महोच्चं
वाणिज्यकेन्द्रं प्रविभासमानम् ॥२॥

ततो जगत्या विविधप्रदेशे
वाणिज्यकार्यं तनुतेऽतिशीघ्रम् ।
अमेरिका-फ्रान्स-जपान-चीना
ब्रिटन्-प्रधाने धरणीप्रदेशे ॥३॥

वाणिज्यकेन्द्रस्य विषाणयुग्मं
हर्म्यद्वयं लोकमनोहरं तत् ।
अमेरिका-देश-विलोचनं सत्
विश्वे प्रसिद्धं पुरतल्लजस्तत् ॥४॥

शताधिकाट्टाधिक-शोभितं तद्
वाणिज्यकेन्द्रं जनचित्तहारी ।
तत्पार्श्वहर्म्यान्तर-मध्यवर्ती
विवृत्ततुण्डेन निरीक्षते ना ॥५॥

हर्म्यं तदारुह्य यदीक्षतेऽधो
बृहन्ति यामानि कणायितानि ।
नराः समस्ताः परमाणुकल्पाः
दृष्टा भवेयुर्न हि तत्र शङ्का ॥६॥

विहङ्गमानां खलु मानहारि
हर्म्ये तदाकाशतलान्तचुम्बि ।
देहेन ये नाकमभीप्सवस्ते
नूनं तदारुह्य मुदा यतेरन् ॥७॥

सहस्त्रशस्तत्र जनाः स्वकार्ये
निरन्तरं युक्तधियो रमन्ते ।
प्रान्तीय-भेदादि-विवक्षया ते
नैवान्यकार्याणि विनाशयन्ति ॥८॥

ऐदंयुगीनं विविधं च तन्त्रं
विकासमाप्तं भुवि तत्र सर्वम् ।
तान्त्रं विकासं समवेक्ष्य विश्वे
स्थानं प्रधानं समदायि तस्मै ॥९॥

न्यूयार्कदेशस्य मणिर्महार्घ-
स्तत्रस्थहर्म्येषु विराजमानम् ।
हर्म्यं नराणां कुशलत्वसूचि
तद्देश - संमान - विशेष-हेतुः ॥१०॥

सेप्तेंबर्मास-पूर्वार्धे दिने चैकादशे तथा ।
मानव्य-नव्य-विध्वंसे नरमेधोऽभवन्नवः ॥११॥

तस्मिन् दिनेऽप्यन्यदिनानुभावं
सूर्योदयोऽभूत् सकलार्तिहारी ।
निद्रात उत्थाय विधाय वैधं
जनः स्वकर्मस्वभियुक्त आसीत् ॥१२॥

वाणिज्यकेन्द्रे विहितं स्वकर्म
विधातुमेके गतवन्त आसन् ।
तथाऽऽपरे भाग्यसुरक्षितास्तु
गृहे स्वकीये स्थितवन्त आसन् ॥१३॥

कुजवारे तथा तस्मिन् प्रातः सार्धाष्टवादने ।
घातकप्रेरितं वेगाद् विमानं प्राचलत् पुरः ॥१४॥

न्यूयार्कदेशं प्रति खेऽचलत् तत्
तथाऽतिवेगेन महद्विमानम् ।
केचित्तथा घातक-सङ्घ-मुख्या-
स्तस्मिन् विमाने निहितास्तदाऽऽसन् ॥१५॥
प्राणान् परेषां च तथाऽऽत्मनां च
द्वेषाग्निकुण्डे ज्वलितान् विधातुम् ।
क्रूरास्तथा मानव-वेष-भूषाः
गृहीतशस्त्राः निहितास्तदाऽऽसन् ॥१६॥
विषाहिनाऽक्रान्त-गृहान्तवास-
स्फुटानुभूतिर्ननु कीदृशी स्यात् ।
विमानमध्यस्थित-लोकचित्ते
नूनं तदाऽऽजायत सानुभूतिः ॥१७॥
विमानयानान्तगताश्च यात्रिकाः
प्रविश्य मृत्योर्मुखमन्तकारणम् ।
अनाप्य मार्गान्तरमाप्य दुःखं
तदाऽरुदन् भग्नहृदस्तु सर्वे ॥१८॥
दंष्ट्राविषं यो वमितुं समर्थः
स तीक्ष्णदंष्ट्रो भुजगस्तु घोरः ।
कृपां कथं वर्षति दुष्टबुद्धिः
परार्तिहेतुः खलु दुष्टजन्मा ॥१९॥
दत्तो विषं मेघभुजङ्गमौ तौ
समानमेवात्र न कोऽपि भेदः ।
तथापि जीवन्ति जलस्य वर्षात्
मृता भवेयुर्भुजगस्य दंशात् ॥२०॥
यानं तदा यात्रिकवृन्दयुक्तं
वाणिज्यकेन्द्रस्य विषाणमेकम् ।
वेगेन गत्वा महता तदानीं
महाग्निगोलं समघट्टयत् तत् ॥२१॥

युगान्त-कालोत्थ-महाग्नितप-
स्फुटार्चिषा यानगताः प्रभीताः ।
उच्चै रुदद्भिः शलभायितं तदा
क्षणेन मृत्युप्रविभीषणाग्नौ ॥२२॥

कुतोऽयमग्निर्भयदार्चिषाऽऽवृतः
पुरः क्षणादाविरभूद् युगान्तकः ।
विस्फोटनं किंनु किमन्यदत्र वै
जातं भवेदेवमितीरितं जनैः ॥२३॥

ततः पलायन्त जवेन केचिद्
भयाद् युवानो महतोऽग्निकुण्डात् ।
तथा न शक्ताः प्रपलायितुं ये
भस्माभवँस्ते निमिषेण तत्र ॥२४॥

केचित्तदा वह्निमहोग्रतापं
सोढुं न शक्ताः शलभायमानाः ।
वातायनेभ्यः प्लवनेन भूमिं
प्राप्यैव तूर्णं गगनं समायुः ॥२५॥

प्रत्यक्षमेवंविधमृत्युबाधां
विलोक्य केचिद् भयमाप्य तीव्रम् ।
निरुद्धहृत्पीडन-कारणेन
सद्यो विमुक्तिं मरणेन चापुः ॥२६॥

तथा समक्षं मरणं विलोक्य
घोरं भयात् केचन दिङ्विमूढाः ।
हर्म्यान्तरादेव गवाक्षमार्गात्
कूर्देन सद्यस्त्वलभन्त मुक्तिम् ॥२७॥

जनं विलोक्य प्लवमानमेवं
सर्वे प्रभीता रुरुदुर्महोग्रम् ।
सद्यो ज्वलन्वह्निमहोग्रकुण्डे
प्रविश्य चक्रुर्मरणान्तसत्क्रियाम् ॥२८॥

हाहाकाराः पादस्खलने
सोपानाग्राद् भूमौ पतनम् ।
जीवन्मरणं मृत्युस्फुरणं
नश्यज्जीवन-रज्जुग्रहणम् ॥२९॥
ज्वलत्सु देहेषु तदाऽतितापात्
भ्रष्टं तदाऽसीद् भवनं समस्तम् ।
तदैव यानं त्वपरं तरस्वि
द्वितीयहर्म्यं समघट्टयत् तत् ॥३०॥
द्वितीयमेतन्ननु मृत्युचक्षु-
र्युगान्त-कालानल-भीकरं सत् ।
तद्भीकरज्वालगुहान्तरान्त-
र्गताः क्षणे भस्म बभूवुरेके ॥३१॥
परे च जीवन्मरणोभयार्ताः
स्वबुद्धिदृष्टां दिशमभ्यपप्तन् ।
तथाऽतिदुःखेन रुदद्भिरेवं
हर्म्यं तु कोलाहलपूर्णमासीत् ॥३२॥
महोग्रतापेन यदा हि तस्य
हर्म्यस्य लोहस्तरसा प्रदग्धः ।
भारं तदा तस्य विषोढुमुग्रं
हर्म्यं त्वशक्तं भुवमाप वेगात् ॥३३॥
सहस्रशः प्राणपरीप्सया ये
तदा समन्ताद् गतिमन्त आसन् ।
तेषां महद्दुःखवशेन भिन्नं
हर्म्यं तदा भूमिगतं बभूव ॥३४॥
दुःखातिरेकेन जनान् विधाय
स्वाङ्के यदा हर्म्ययुगं पपात ।
तदैव भग्नानि भुवो मनश्च
तद्देशमानश्च सतां मनश्च ॥३५॥

क्षणेन तत् स्थानमभूत् श्मशानं
नाट्याङ्गणं मृत्युमहेश्वरस्य ।
स्वजाति-हत्याहित-दुष्टबुद्धिः
कुर्यान्न किं मानवनाशनार्थम् ॥३६॥
तदोत्थितं घोररजस्तु तूर्णं
तमःप्रकाण्डेन दिशः प्रलिम्पत् ।
सत्त्वं तु तत्पार्श्वगतस्य मुष्णत्
न्यूयार्क-वाषिंग्टनमाप्तवत् तत् ॥३७॥
ग्रहान्तरेभ्यो भुवमेत्य कश्चिद्
विनाशनं नैव करोति भूमेः ।
यद्वा ग्रहस्यैव विशीर्णखण्डः
पृथ्वीं न घोरः प्रविघट्टयेत् नः ॥३८॥
यावन्मतान्धाः नरमेधमेवं
कुर्वन्ति तावन्न भवेत् प्रशान्तिः ।
परस्पर-द्वेष-मलीमसं हि
जह्युर्नराः शान्तिमभीप्सवस्तु ॥३९॥
अहं प्रधानोऽस्मि ममैव लोको
मत्तो न कोऽप्यस्ति वरः पृथिव्याम् ।
मामेव लोके मनुजा नमेयु-
रित्थं ब्रुवाणो लयमेति लोके ॥४०॥
मानव-बुद्धि-मालिन्यं दूरीकर्तुं सतां मनः ।
व्यवस्यतु सदा युक्तं शान्ती राज्यं करोतु च ॥४१॥
निगमोक्तं शतं पूर्णं वर्षाणां भुवि मानवः ।
जीवेद् वर्षशतस्यान्ते प्रसन्नः शान्तिमाप्नुयात् ॥४२॥
द्वेषो नश्यतु मूढभावभरितः क्रोधोऽपि संनश्यतु
नाशं यान्तु समस्त-मूढमतयो लोकस्य विद्रोहकाः।
लोकः प्रेमरसामृतं भुवि सदा चास्वाद्य मोमुद्यतां
घोरः क्वापि जनस्य मूढमतितो नाकालमृत्युर्भवेत् ॥४३॥

दिनांकः ११ सितम्बर, २००१

संसद्भवनोपर्यातङ्कवादाक्रमणम्

–प्रा० हरिश्चन्द्र रेणापुरकरः,
जेवरगीनिवासः, होटल परिवारस्य पृष्ठतः, गुलबर्गा

देशस्य गौरवमये जनतन्त्रसौधे
जातस्त्रयोदशदिने च दिसम्बरस्य ।
आतङ्कवादिविकरालमहाभियोगः
पञ्चोग्रवादिसह द्वादश घातिताश्च ॥१॥

सार्धैकादशवादने च सदनं निर्वृत्तकार्ये सति
संसद्व्यञ्जकरक्तदीपसहितं संसत्सभाप्राङ्गणे ।
पञ्चक्रूरमहोग्रवादिसहितं यानं च तत्रागतं
तत्रारक्षिगणैर्विरन्तुमुदिते तैर्गोलिकाश्चालिताः ॥२॥

धावन्तः सदने प्रविश्य विकटं ध्वंसं विधातुं क्षमाः
सर्वे पञ्चमहोग्रवादिकितवा आरक्षिभिर्घातिताः ।
सप्तारक्षिजनैरपीह सुतरां हौतात्म्यमङ्गीकृतं
विद्धाश्चैव हि सप्तविंशतिजना नाशो महान् वारितः ॥३॥

अस्मिन् भीषणदारुणोग्रसमये द्वारे स्थितारक्षिभिः
सन्तोषाभिध-यादवाख्यसदृशैर्विक्रान्तवीरोत्कटैः ।
प्राणत्यागिभिरेव दक्षकुशलं नैवाचरिष्यद् यदि
का घोरा विपदापतिष्यदिति तन्नोत्प्रेक्षितुं शक्यते ॥४॥

घोरास्फोटकपूर्णमेव समभूदातङ्कियानं खलु
तेनानर्थ इहाभविष्यदतुलो नूनं महाभीषणः ।
उद्ध्वस्तं ह्यभविष्यदेव सकलं संसत्सभामन्दिरं
प्रायो मन्त्रिसमं च सांसदगणो नष्टोऽभविष्यद् ध्रुवम् ॥५॥

अस्माकं प्रतिवेशिकूटकपटं तन्निश्चितं दृश्यते
कश्मीरीयविधानसौधभवने घोराक्रमस्तैः कृतः ।

तैरेवाद्य कृतोऽस्ति भारतभुवो ह्येव घोराक्रमो
नूनं भारतमानगौरवयशस्तेजस्विता धर्षिताः ॥६॥

लोके श्रेष्ठतमस्य भारतभुवस्तल्लोकतन्त्रालये
नूनं भारतवर्षसंसदि कृतो घोरो महोग्राक्रमः ।
प्रत्यक्षं महनीयभारतभुवो ह्याक्रमो वर्तते
शक्त्या तं प्रतिहन्तुमद्य सकलं राष्ट्रं भवत्युद्यतम् ॥७॥

पाकिस्तानरहश्चराभिकरणस्यैवास्ति दुश्चेष्टितं
जैशे मोहृदतोयबालशकराभ्यामेव तत्कल्पितम् ।
विज्ञप्तः प्रतिबन्धितुं दलयुगं पाको महामन्त्रिभि-
र्नेतृंश्चापि तयोर्निगृह्य विभवं नूनं ग्रहीतुं तयोः ॥८॥

पाकाध्यक्षमुशर्रफेन दलयोः कृत्यं ह्यमान्यीकृतं
साक्ष्यं तस्य कृते च तेन बलवत् प्रस्तोतुमभ्यर्थितम् ।
पाकं दूषयितुं सहेतु रचितं षड्यन्त्रमेवास्ति तद्
इत्थं तेन हि भारतोपरि महाघोरापवादः कृतः ॥९॥

पञ्चातङ्किजनाश्च नूनमभवन् पाकस्य वै नागरा-
स्तस्य प्रस्तुतपूर्णसाधनमपि ह्यस्वीकृतं स्वैरिभिः ।
घोरातङ्किविरुद्धशास्तिरपि तैः स्पष्टं निरस्तीकृता
नूनं भारतमेव तर्जितमभूत् कर्तुं न तत्साहसम् ॥१०॥

तालीबानविरुद्धघोरसमरे पाकोपकाराद् ध्रुव-
मम्रीकाऽपि तदीयभीषणकृतिं दृष्ट्वाऽपि मौनं भजेत् ।
इत्यालोच्य कृतो विधानभवने घोराक्रमः कश्मिरे
केनाप्यस्य निषेधमात्रकरणान्नानुष्ठितं किञ्चन ॥११॥

दृष्ट्वा तस्य विरुद्धभारतकृतिं ह्याक्रोशमात्रस्थितां
तत्प्रोत्साहितपाकघोरकितवैस्तेनैव संप्रेरितैः ।
दिल्ल्यामेव दिवैव भारतभुवः संसत्सभामन्दिरं
घोराक्रान्तमभूद् विधातुमतुलं देशे महाविप्लवम् ॥१२॥

नूनं भारतमानबिन्दुरपरं हृत्कल्पमेवास्ति यत्
श्रेष्ठं भारतलोकतन्त्रसरणेर्नूनं प्रतीकं महत् ।
तस्यामाक्रमणं हि संसदि कृतं ह्याह्वानमेवास्ति तद्
आशैलेश्वरसेतुविस्तृतमहादेशं महाभारतम् ॥१३॥

राष्ट्रस्याखिलराजकीयमुखरान् सद्यो निहन्तुं कृतं
पाकस्यैव महोग्रकूटकपटं षड्यन्त्रमेवास्ति तत् ।
इत्थं घोषितमेव संसदि गृहामात्यैः प्रमाणैः समं
मूलात्पाटयितुं तदेव सकलं राष्ट्रं भवत्युद्यतम् ॥१४॥

राष्ट्रस्यैव महास्मितोपरि कृतादस्मान्महोग्राक्रमात्
क्रुद्धं भारतराष्ट्रमिच्छतितरां शीघ्रं च घोरां कृतिम् ।
राष्ट्रामात्यवरैरपीह कथितं निर्णायकः स्याद्रण-
श्चिन्त्येरन् सकला विकल्पपरमाः पूर्वं च युद्धादिति ॥१५॥

एकेनैव महाक्रमेण कुपितैः श्रीमद्बुशैः सत्वरं
तालीबानकुशासनोपरि महाघोराक्रमोऽनुष्ठितः ।
अस्माकं दशकद्वये तु निहताः षष्टिः सहस्त्रं जनाः
ससंच्च प्रहृता तथापि नितरां तैर्बोध्यते सयंमः ॥१६॥

उच्चै राष्ट्रियमानबिन्दुकथिते संसत्सभामन्दिरे
ह्याक्रान्तेऽपि महोग्रवादिकितवैर्यैः संयमो बोध्यते ।
पाकस्तैः प्रथमं हि संयमकृते सम्बोधनीयः सुहृद्
अस्मत्संयम एव पूरित इति प्रोक्तं महामन्त्रिभिः ॥१७॥

पाकाद्भारतदूत एव सहसा प्रत्याहृतो भारतैः
समझौताभिधरेलयानसहितं लाहौरसंज्ञं बसम् ।
वर्षारम्भत एव रोद्धुमपि तैर्निर्धारितं भारतै-
रेतत्पाकविरुद्धभारतकृतेराद्यो विकल्पो ध्रुवम् ॥१८॥

पाकिस्तानविमानयानडयनं रुद्धं स्वदेशाम्बरे
दूतावासनिविष्टलोकगणनाऽप्यर्धेन न्यूनीकृता ।

दिल्लीतो गमनं बहिश्च सहसा तेषां निरुद्धं तथा
संग्रामेतरकूटनीतिपरका एतेऽप्युपायाः कृताः ॥१९॥

पाकैः पालितपोषितोग्रविकरालातङ्कवाद्यासुरै-
र्देशे विंशतिवर्षदीर्घसमयात् पञ्जाबकश्मीरयोः ।
यो घोरो विकटोग्रभीषणतमो हत्याक्रमश्चाल्यते
तं ज्ञात्वाऽपि तदर्थसाधनमिहाद्याम्रीकया वाञ्छ्यते ॥२०॥

पाकिस्तानगतोग्रवादिकितवैरेवास्ति तत्साधित-
मित्येतत् प्रतिपादनाय कथितो ह्याम्रीकया भारतः ।
सुस्पष्टं प्रबलं प्रमाणनिवहं सम्प्रस्तुते भारतै-
र्जैशे-लश्कर-संज्ञितोग्रघटने दोषास्पदे स्वीकृते ॥२१॥

पाकस्यापि शनैः करालकपटं विज्ञातमम्रीकया
ह्यादिष्टश्च महोग्रवादिघटने पाको निषेद्धुं द्रुतम् ।
पाकेनापि बलात्तथैव विहितं ह्याम्रीकिसम्पीडना-
ल्लेखादिश्च तयोर्न वापि पिहितो नो नायकास्तैर्धृताः॥२२॥

श्रुत्वा भारतदौत्यभावविरतिं पाकात्कृतां भारतै-
रादिष्टः प्रतिबन्धितुं दलयुगं पाकोऽपि मित्रं बुशैः ।
जैशे-लष्कर-संज्ञितोग्रघटने पाकाद्बहिस्थे इति
पाकं रक्षितुमेव मित्रपरमं मिथ्यैव तैर्भाषितम् ॥२३॥

विश्वाद् घोरतमोग्रवादविपदं ह्युच्छेत्तुकामाम्रिकां
युक्तं नैव कदापि पाकसदृशं घोरोग्रवादोद्भवम् ।
राष्ट्रं स्वार्थकृते करालदुरितान्मुक्तं समुद्घोषितुं
शान्त्यर्थं ह्यनिवार्यमेव नितरामागस्कृतां दण्डनम् ॥२४॥

युद्धं वारयितुं प्रयत्नपरमान् सर्वान् करिष्यामहे
सम्पूर्णान्यपि कूटनीतिकरणान्याद्यं वयं कुर्महे ।
सर्वेषां विफलीकृते च समरो ह्यन्ते विधीयेत तद्
अन्त्यं निश्चयकारि चैव भवितेत्युक्तं महामन्त्रिभिः ॥२५॥

दूतान् प्रेष्य समस्तमित्रविषयान् मुस्लीमदेशांस्तथा
पाकप्रेरितपोषितोग्रकितवैः संसत्सभामन्दिरे ।
कश्मीरीयविधानसौधभवने चानुष्ठितोग्राक्रमं
प्रत्यावेद्य ऋतं विधेयमखिलं तथ्यानुकूलं जगत् ॥२६॥

दावूदोग्रमसूदमेमनसमोग्रातङ्किनामावलिः
सर्वानर्पयितुं च भारतभुवे पाकाय दत्तास्ति तैः ।
अम्रीकाप्रबलप्रपीडनवशान्नैके च बन्दीकृता
इत्येतद् यदि सत्यमस्ति सुतरां तत्स्वागतार्हं भवेत् ॥२७॥

आन्ताराष्ट्रियपीडनेन यदि ते कुर्वन्ति तन्नाटकं
घोरोग्रः समरो भवेत् परिहृतः कालाय किञ्चिद् ध्रुवम्।
तस्मादाणविकोग्रभीषणरणः स्यादेव संहारकृद्
नूनं तत्परिहर्तुमेव भुवने यत्नाः क्रियन्तेतराम् ॥२८॥

विश्वापीडनकारणाद् भ्रमयितुं कुर्वन्ति चेन्नाटकं
नूनं ते न जहादिघोरकितवान् दास्यन्ति नः शासितुम् ।
ह्यो यावत्खलु मुक्तिवीरपरमाः पाकेन ये घोषिता-
स्तानेवाद्य कृतापराधिविकटान् नो घोषयेन्निश्चितम् ॥२९॥

दावूदादिकघोरविंशतिशठप्रत्यर्पणाभ्यर्थना
पाकेन प्रबलं निराकृतचरा साक्ष्यं पुनर्याचितम् ।
अम्रीकासहितं भवं भ्रमयितुं पाकेन सङ्कल्पितं
तेषां निग्रहणं शताधिकजनानामस्ति धौर्त्यं ध्रुवम् ॥३०॥

अणवस्त्रैरुपपन्नराष्ट्रवरयोर्युद्धं भवेद् भीषणं
तस्माद् वारयितुं समस्तविषयैः संभूय संघट्यते ।
युद्धस्योभयपक्षतस्तु सकला सिद्धिर्ह्यनुष्ठीयते
पाकस्यैव वशेऽस्ति तत्परिहृतिर्ह्युक्तं महामन्त्रिभिः ॥३१॥

सोऽयं घोररणो भवेत् परिणतो ह्यणवस्त्रयुद्धे ध्रुवं
तर्कातीतकरालघोरविकटो विश्वस्य नाशो भवेत् ।

अम्रीकैव निवारणाय नियतं युद्धस्य शक्ता भुवि
प्रत्यावर्तयितुं महोग्रकितवान् पाको निपीड्यस्तया ॥३२॥

लादेनस्य समर्पणं परिहृते तत्राफगानाधिपै-
स्तालीबानविरुद्धघोरसमरो ह्युद्घोषितः श्रीबुशैः ।
पाकैः संसदि भीषणाक्रमकृतां प्रत्यर्पणं धिक्कृते
पाको घोरतमोग्रवादिशरणं किं नाभियोज्यो भवेत् ॥३३॥

पाकाध्यक्षमुशर्रफोऽपि विकरालातङ्किभिस्तर्जितो
यत्तेषां प्रतिपादनाय रिपवे यत्नो विधीयेत चेत् ।
अध्यक्षस्य विरुद्धमेव सकलं राष्ट्रं भवेदुत्थितं
देशे तस्य विरुद्धभीषणतमा क्रान्तिश्च नूनं भवेत् ॥३४॥

विश्वं भ्रामयितुं करिष्यतितरामातङ्किनां निग्रहं
पाकस्तांस्तु कदापि भारतभुवं नो प्रेषयेच्छास्तये ।
एवंभूतगतौ करालसमरो नूनं ह्यवार्यो भवेत्
भाव्यं तेन सदैव भारतभुवा युद्धाय सन्नद्धया ॥३५॥

पाकाध्यक्षमुशर्रफोऽपि नियतं मन्येत युद्धं वरं
संभाव्याद् गृहयुद्धसंकटभयात् स्वस्यैव घातात्मकात् ।
तेनैव प्रकटीभवेच्च जगति व्याप्तोग्रवादं प्रति-
योद्धुं नूनममेरिकाऽपि कियती प्रामाणिकी स्यादिति ॥३६॥

प्रत्यावर्तयितुं महोग्रकितवान् पाकैर्निषिद्धं पुनः
सीमास्वाक्रमणं निरीहहननं कुर्वन्ति नित्यं शठाः ।
पाकस्तान् प्रकटीकरोति कितवान् स्वातन्त्र्ययोधा इति
युद्धान्नैव विकल्प एव सुतरामस्यां स्थितौ विद्यते ॥३७॥

कश्मीरेऽपि महोग्रवादिकितवैर्निर्दोषहत्याक्रमः
पाकाध्यक्षमुशर्रफोऽपि कथितो नैवास्ति मुक्ते रणः ।
किन्त्वत्यन्तकरालभीषणमोग्रातङ्कवादोऽस्ति सः
इत्यध्यक्षबुशैरपीह घुषितं सत्येन नूनं जितम् ॥३८॥

पाकाध्यक्षमुशर्रफोऽपि सुदृढं तं रोद्धुमुक्तो बुधैः
लोके घोषयितुं च कथितो ह्युद्देश्यमेवात्मनः ।
वार्ता घोरतमोग्रवादविरमात् पूर्वं न शक्या भवे-
दित्थं स्पष्टमुदीरितं च मिलने पाकाय श्रीब्लेयरैः ॥३९॥

आन्ताराष्ट्रियघोरमुस्लिममहोग्रातङ्कवादाग्रणीः
पाको घोरतमोग्रवादशिबिराण्यायोज्य देशे कथम् ।
कश्मीरे हतवानपापसुजनांस्त्रिंशत्सहस्त्राधिकान्
दूता ज्ञापयितुं समस्तभुवने प्रेष्यन्त एवाधुना ॥४०॥

विश्वापीडनकारणादपि विवेकश्चेद्भवेज्जाग्रतः
पाकाध्यक्षमुशर्रफे च यदि ते स्तभ्नीयुरातङ्किनः ।
शान्त्यैश्वर्यसमृद्धिरेव भविता नूनं दृढा देशयो-
र्घोराण्वस्त्रकरालभीमसमरो नूनं भवेद् वारितः ॥४१॥

कश्मीरं हि जिहीर्षुपाकविषयः केनाप्युपायेन वै
कृत्वा घोरतमोग्रभीषणरणान् नूनं चतुर्निष्फलान् ।
तल्लिप्सुर्विदधात्यघोषितरणं घोरोग्रवादाभिधं
यस्मिंस्तेन हता अपापसुजनास्त्रिंशत्सहस्त्राधिकाः ॥४२॥

क्रीतानीतसहस्रशो भृतिभटा घोरास्त्रशस्त्रैर्युताः
कश्मीरेण समं समस्तविषये तैः प्रेषिता घातुकाः ।
युद्धार्थं शिबिराणि तत्र शतशश्चाल्यन्त एवानिशं
सङ्घर्षाद्विरतो भवेन्न नियतं पाकः स्वघातोद्यतः ॥४३॥

कश्मीरं भवतीह भारतभुवो नूनं ह्यभिन्नाङ्गकं
पाकेनाध्युषितस्तदीयविषमस्त्याज्यः स्वयं सत्वरम् ।
इत्येवास्ति यथार्थकश्मिरभुवो नूनं समस्याऽधुना
ह्येवं घोषितमस्ति भारतमहामात्यैर्दृढं नैकशः ॥४४॥

पाकिस्तानमहोग्रवादविषये संसूचिता नैकशो
ह्यम्रीका न चकार किञ्चन विना संवेदनां शाब्दिकीम् ।
कश्मीरे निहता महोग्रकितवैस्त्रिंशत्सहस्रं जनाः
पाको घोरतमोग्रवादिविषयत्वेनापि नो घोषितः ॥४५॥

आन्ताराष्ट्रियघोरमुस्लिममहोग्रातङ्कवादासुर-
स्याम्रीकाऽपि यदा बभूव विकटं लक्ष्यं महाभीषणम् ।
उत्तुङ्गार्थिकसैन्यशक्तिगमकाद् हर्म्यद्वयध्वंसनात्
विज्ञातं च तदोग्रवादविपदो दुःखं तया दारुणम् ॥४६॥

आङ्ग्लामेरिकनादिराष्ट्रपरमैः स्वार्थान्धसेर्ष्यैर्भुवि
मा भूद्भारतमत्र शक्तिरतुला तेषां प्रतिस्पर्धिनी ।
रुद्धोत्कर्षविकाससिद्धिरिह यो युद्धे रतत्वाद्भवे-
दित्यर्थं प्रचुरास्त्रशस्त्रविभवः पाके भृशं वर्षितः ॥४७॥

तस्यैवास्ति करालघोरविकटा निष्पत्तिरेषाऽधुना
यच्छस्त्रास्त्रविशालवित्तविभवं निःशङ्कमेवात्र तैः ।
तेषामेव विरुद्धमद्य सकलं नूनं प्रयुक्तं शठैः
दिष्ट्या तस्य चिरात्प्रतीतिरपि तान् जातेति नाल्पं खलु ॥४८॥

देशे विंशतिकोटिमुस्लिमजना विश्वस्य राष्ट्राणि च
पाकिस्तानकरालभीषणतमोग्रातङ्कवादं प्रति ।
स्वाक्रोशं प्रखरं विरोधमपि चेत्सन्दर्शयेयुस्तदा
प्रश्नः स्यात् प्रशमं भवेत् परिहृतो नोचेदवार्यो रणः ॥

पाको भारतवैरशोधनकृते तत्खण्डने सोत्सुको
यावन्नो लभते च कश्मिरभुवं तावन्न शान्तो भवेत् ।
तस्मात्तेन समं निरस्य नियतं सौहार्दसम्भाषणं
कार्या घोरतमोग्रशत्रुसदृशी नूनं कठोरा कृतिः ॥५०॥

शत्रूणां विकरालकूटकपटं दृष्ट्वाऽप्यभीक्ष्णं कृतं
कर्तुं ये प्रभवन्ति नो प्रतिकृतिं शीघ्रं च कालोचिताम् ।
ये तु प्रत्युत दर्शयन्ति करुणां क्षान्तिं सदा शत्रुषु
ते राष्ट्रं खलु पातयन्ति नियतं दुःखोदधौ भीषणे ॥५१॥

दि. १०.१.२००२

पाणिपञ्चाशत्

(श्रीमदपर्याप्तामृतस्वामीति प्रसिद्धस्य कुम्भघोणम्
श्रीशार्ङ्गपाणेरभयहस्तमभिष्टूय रचितं स्तोत्रकाव्यम्)

रचयिता- बालकविः श्रीसुन्दरराजः

अस्ति प्रशस्ता दिशि दक्षिणस्यां श्रीकुम्भघोणाख्यपुरी पवित्रा।
यत्रास्ति वित्रस्तशरण्यभूतश्श्रीशार्ङ्गपाणिस्सहितः प्रियाभिः ॥१॥

शङ्खचक्रधरश्श्रीमानभयं दक्षिणे करे ।
सव्ये धनुर्गदे कट्यां खड्गं बिभ्रत् स दीव्यति ॥२॥

तस्य देवादिदेवस्य दक्षिणो विस्तृतः करः ।
सभयागतजन्तूनामभयाय विराजते ॥३॥

शङ्खस्पर्शादस्य पाणेः पुराऽभूत् ज्ञानप्राप्तिर्बालकस्य ध्रुवस्य ।
पाणौ दृष्ट्वाऽस्याद्य शङ्खस्य रेखां ज्ञानप्राप्तिर्बालिशानां भवेन्नः॥४॥

अहमपि यदि मूढो दर्शनेनास्य पाणेः
अपगतमतिमोहस्संप्रति प्राप्तबोधः ।
गुणगणगणनार्थं प्रोद्यतश्शार्ङ्गपाणेः
क इव खलु स मूर्खो यो भवेन्न प्रबुद्धः ॥५॥

पातु वः पद्मनाभस्य दक्षिणं पाणिपङ्कजम् ।
वामेतराक्षिसान्निध्यादुन्मीलितमिव स्थितम् ॥६॥

दक्षिणं पक्षिवाहस्य पाणिं वन्देऽरुणप्रभम् ।
पूर्वाचल इवाभाति येन भानूदये प्रभुः ॥७॥

शैवालश्यामनालाग्रे नालीकमिव पुष्पितम् ।
[१]दक्षिणो विस्तृतः पाणिः राजते शार्ङ्गराज ते ॥८॥

कालाहिरिव पञ्चास्यश्शरनिर्भिन्नमस्तकः ।
पाणिस्ते दक्षिणश्शार्ङ्गिन् राजते रुधिरारुणः ॥९॥

अस्मदर्थे स्त्रुतैरस्त्रैः मात्रा संवर्धितस्य ते ।
दयार्द्रो दक्षिणः पाणिः प्रथमः पल्लवोद्भवः ॥१०॥

लुठतामन्धकारे नो दयया किं दयानिधे ।
दिदर्शयिषुरात्मानं प्रदीपीकुरुषे करम् ॥११॥

नीलोत्पलद्युतिः पृष्ठे पुरस्तात् कुमुदारुणः ।
अक्षिभ्यां पुष्पवद्भ्यां ते करो द्वाभ्यां विकासितः ॥१२॥

द्रागेव वक्षसा पत्नीं शार्ङ्गपाणे बिभर्षि ते ।
तस्या आसनमप्यद्य किं हस्तेनोद्दिधीर्षसि ॥१३॥

हिरण्यवर्णां वक्षस्स्थां हेमपाणिरुचा श्रियम् ।
आलिप्य किं तिरोधास्यन् विस्तारयसि ते करम् ॥१४॥

पद्मं पद्मत उद्भूतं दृष्टं किं जगतीतले ।
पश्यतात्र पयोजाङ्कं शार्ङ्गिणः पाणिपङ्कजम् ॥१५॥

सङ्के कलौ युगे शक्तिरिति बोधयतीव नः ।
शार्ङ्गिन् विस्तारितः पाणिस्संयुक्ताङ्गुलिरेष ते ॥१६॥

निद्रासि न त्वं जागर्षीत्येष आख्याति ते करः ।
स्वापे तेऽस्तमिते सूर्ये पद्मं विकसतात् कथम् ॥१७॥

ब्रह्माण्डमखिलं नस्ते पश्यतां पाणिपङ्कजे ।
कुम्भसंभवहस्तस्थं सिन्धुं श्रुत्वा न विस्मयः ॥१८॥

रमाकपोलस्पर्शेन मृदुर्जातः करस्तव ।
अन्यथा कथमस्य स्यादियती मृदुता हरे ॥१९॥

दर्शनादेव पाणेस्ते मोहो व्यपगतो मम ।
आमर्शनान्न जानेऽस्य ज्ञानं कियदुदेष्यति ॥२०॥

हेमाङ्गुलीयकं हस्ते तव हेममये स्थितम् ।
प्रकाशते न सुव्यक्तं परिवेषे सरोचिषि ॥२१॥

कोटिसूर्यद्युतिर्हीरः पाणिमध्यस्थितस्तव ।
अस्मत्स्वान्तस्थिताज्ञानध्वान्तविध्वंसभास्करः ॥२२॥

वैभवं विस्तृतस्यास्य पाणेस्ते वर्ण्यतां कथम् ।
विश्वनिर्माणसंहारपरित्राणैककारणम् ॥२३॥

मा भूत सर्वे सुजनाः धर्मैकनिरताशयाः ।
तर्हि कोमलवल्लीशपाणेः किं वा प्रयोजनम् ॥२४॥

पयःपानमिषेणाभ्रं किमिदं पीतपङ्कजम् ।
इति संदेहदं गात्रं शतपत्रकरं तव ॥२५॥

नोद्धृतं बाहुना चापं न समारोपितो गुणः ।
न कृतं शरसन्धानं कथं ते करविस्तृतिः ॥२६॥

प्रभोर्मे चरणाम्भोजग्रहणाद्युगपद्धसेत् ।
कराम्भोजं मुखाम्भोजं नेत्राम्भोजं च विस्मयः ॥२७॥

त्वत्कराब्जविकासः प्राक् पश्चाद्ज्ञानारुणोदयः ।
पौर्वापर्यक्रमः कोऽयं नैमित्तिकनिमित्तयोः ॥२८॥

वक्रचन्द्रकलाचूडाः अर्धनारीश्वरायिताः ।
अर्धवृत्तनखोत्तंसाः अङ्गुल्यस्तव शार्ङ्गिणः ॥२९॥

बालं विद्वांसं वा बालिशमपि वा तनोति यस्साधुम् ।
जडजसमानस्ते सन् जयति करो वर्णनातीतः ॥३०॥

वन्दे मुकुन्दपाणिं वामान्यं मान्यमब्जनिभम् ।
कान्ताविलोचनान्ताः आपद्यन्ते द्विरेफतां यत्र ॥३१॥

पाणिं भवतः शार्ङ्गिन् नीलं बहिराभ्यन्तरे च रक्तम् ।
दयिताशुको ग्रहीतुं जम्बूफलमेतदिति यतते ॥३२॥

शङ्खचक्रसरसीरुहचिह्नैरङ्कितः किल करस्तव शार्ङ्गिन् ।
किं तथाऽपि विजहासि न सद्यश्शङ्खचक्रधरतापुनरुक्तिम् ॥३३॥

इन्द्रियाणि तव पञ्च नियम्य मन्मुखानि कुरु मानव भूत्यै ।
उन्मुखाङ्गुलिरितस्तव पाणिरेष शार्ङ्गधर बोधयतीव ॥३४॥

धर्ममाचर मनुष्य पञ्चता संभविष्यति यदा कदाऽपि ते ।
इत्ययं वितनुते करस्तव तत्त्वबोधनमितश्शरीरिणाम् ॥३५॥

देहिनां जगति देहिवाचिनां श्रीपते तव समीपमीयुषाम् ।
कल्पवृक्ष इव कामितार्थदः पञ्चशाख उपकल्पितः पुरः ॥३६॥

मृदु तथाऽपि ससारमिदं विभो तव भयप्रदमप्यभयप्रदम् ।
करतलं तुलनां जगतीतले न हि बिभर्ति धृताखिलभूतलम् ॥३७॥

अपि पाणिरङ्गुलिभिरीशितुर्यथा सममुन्नताभिरयमञ्चितो न मे ।
भुवने तथैव मनुजौ भविष्यतो न मिथस्समाविति किल ब्रवीषि नः ॥३८॥

आकाशवातानलवारिभूभिस्त्वं निर्मितः पञ्चभिरेव भूतैः ।
किं विस्तृतः पाणिरयं त्वदीयस्तत्त्वं नृणां बोधयतीदमेव ॥३९॥

जलप्रपूर्णेषु सरोवरेषु सरोरुहं स्यान्न शिलोच्चयेषु ।
परं त्वितो रक्तसरोजमेकं हेमाद्रिमध्ये विकचं विभाति॥४०॥

पुरा सरोजं मम नाभिजातं चराचरं लोकमिमं ससर्ज ।
इदं पुनस्तं परिपातु सर्वमितीव किं विस्तृतवान् कराब्जम् ॥४१॥

इदं न ते पाणितलं सुकोमलं कठोरबाणासनकर्मणि क्षमम् ।
अलीकमेतद्यदि कर्तुमिच्छसि शरैरघौघं जहि तर्हि मामकम्॥४२॥

पद्मं बिभर्ति निजपाणिपयोरुहेण
पद्मायताक्षि भवतीति पयोजनाभः ।
पार्श्वस्थितां प्रियतमां परिहस्य नूनं
विद्योतते सपदि विस्तृतपाणिपद्मः ॥४३॥

मूढा इमे न मनुजा अवधारयन्ति
संतोष आशुग इति क्षणिकश्च भौमः ।
इत्याशुगं करतलोपरि संदधानः
आगच्छतामुपदिशत्ययमालयं स्वम् ॥४४॥

न मम निकटमीयास्तत्र तिष्ठेति दुष्टं
नियमयसि करेण स्वेन शार्ङ्गिन् सुदूरात् ।
अभयमपि ददासि त्वं प्रपन्नस्य जन्तोः
युगपदुभयकारी विस्तृतस्त्वत्करोऽयम् ॥४५॥

अनुपदमनुकम्पामादरञ्चास्मदर्थे
दनुजकुलविमाथिन् मातरं प्रार्थयन्तीम् ।
अलमिति कथनार्थं विस्तृतः पाणिरेषः
परिणतिवशतो नः कल्पते भीतिहान्यै ॥४६॥

न मरुदरुणपुत्रौ नाङ्गदो नापि मैन्दो
विदितविविधशास्त्रो जाम्बवान्नो न नीलः ।
प्रभुनिकट इदानीमत्र कालव्ययार्थं
प्रणतिरभयलाभस्सद्य एवाविलम्बम् ॥४७॥

जनाश्चञ्चलाश्चञ्चरीकोपमानाः
विचिन्त्येति नूनं तदाकर्षणार्थम् ।
मधुस्यन्दि पद्मं मनोज्ञं कराख्यं
परिद्योति विस्तारयामासिथ त्वम् ॥४८॥

सीमातीतैर्दुरितनिवहैर्दूरिताशेषदैत्यं
मामप्यावर्जयति यदि ते शार्ङ्गपाणे करोऽयम् ।
एतच्चित्रं दशमुखरिपो रावणो राक्षसेन्द्र-
स्सद्यस्साधुर्न कथमभवत्त्वत्करं वीक्षमाणः ॥४९॥

कान्तारान्ते विचरितवता क्लान्तिमत्स्वान्तभाजा
कान्ताचिन्तात्वरितगतिना कामुकेन त्वयेश ।
प्राप्तं तस्या निकटमथ सा नः परित्रातुमम्बा
वाचाऽयाचद्वितरसि ततस्त्वत्करेणाभयं नः ॥५०॥

वात्स्येन बालकविसुन्दरराजनाम्ना
क्लृप्तामतृप्त्यमृत ! दक्षिणपाणिपद्मम् ।
विस्तारितं प्रति नृणामभयप्रदं ते
एतां स्तुतिं त्रुटियुतामुररीकुरुष्व ॥५१॥

पुस्तक-परिचयः

दक्षिणावर्त-विलासम् (महाकाव्यम्)

अनेकग्रन्थकर्तुः डा० सुभाषवेदालंकारस्य प्रत्यग्रं महाकाव्यं 'दक्षिणावर्त-विलासम्' मद्रपुरी-महाबलिपुर-तिरुपति-रामेश्वर-मदुरै-कन्याकुमारी-तिरुवनन्तपुर-मालाबारतटादीनां रम्याणि दृयानि सरससंस्कृतेन अनुष्टुप्प्रधा-नैर्वृत्तैस्स्मत्पुरो निदधाति। भारतस्य दक्षिणभागवर्तिनो रामणीयकस्य कविना यत् साक्षाद्दर्शनं कृतं तदत्र समुपन्यस्तं सद् भारतं प्रति प्रेमाणं पुष्णाति पाठकस्य।

प्रकाशक:-अलंकार प्रकाशन, 74, तनेजा ब्लॉक आदर्शनगर, जयपुर-302004, 2001 , मूल्यम् 225-00 रुप्यकाणि।

(अभिनवः शुक्लः)

सूर्योपाख्यानम्

श्री श्री०सुन्दरराजः

आक्रीडभूमेरधुना निकेतं आयात बालाः अवसाय खेलम् ।
आख्यामि सूर्यस्य कथामशेषां आनन्ददां श्रोष्यथ सावधानाः ॥१॥

त्रिसीमभिर्विश्वमिदं विमुक्तं ब्रह्माण्डसंज्ञं विलसन्ति यत्र ।
नैकप्रपञ्चा अपि नैकसूर्याः लोकाः परीत्यापि च तानतीत्य ॥२॥

वियत्यनन्तान् स्फुटितान् विदूरे विभावरीष्वेव विलोक्यमानान् ।
विवस्वतोऽस्माकमिमानभिन्नान् विज्ञानिनोऽर्कानवदन्न ऋक्षान् ॥३॥

दिनेऽपि ते व्योम्नि विवर्तमानाः सूर्यप्रकाशोपहतस्वभासाः ।
अदृश्यमाना निशि किन्तु दृश्याः सूर्ये धरापृष्ठगते भवन्ति ॥४॥

वेदाः पुराणानि च सप्तसूर्याः दिनं प्रविष्टा इति वेदयन्ति ।
ते कश्यपाज्जोतिरवाप्नुवन्ति यो ह्यष्टमस्सन् न जहाति मेरुम् ॥५॥

आरोगनामा पटरः पतंगः ते स्वर्णरभ्राजविभाससञ्ज्ञाः ।
स ज्योतिषीमान्यमलौ यतोऽर्कौ सप्तप्रकारा दिवि सन्ति सूर्याः ॥६॥

एतादृशान्नाकमनुप्रविष्टान् सूर्यान् विहायापि विहायसीन्धे ।
स्थिरस्थितिः कोऽप्यतिसूर्यतेजाः विज्ञानिनाङ्गीक्रियते तदेतत् ॥७॥

वेदास्तमेवाष्टमसूर्यमाहुः यः कश्यपाख्यो न जहाति मेरुम् ।
ज्योतिर्लभन्ते यत् एव सूर्याः स सूक्ष्मवित्पश्यति सर्वमेकः ॥८॥

आदित्यनिघ्ना उरुसञ्ज्ञलोकाः अन्ये तथाऽदित्यमतीत्य लोकाः ।
नाम्ना वरीयांस इति प्रसिद्धा अष्टादशैषां विदिताः प्रकाराः ॥९॥

लोको वरीयान् स्वयमेव दीप्तो नापेक्षेते सूर्यकृतप्रकाशम् ।
यथा महस्सत्यतपौ जनश्च न स्तो यतो वासरवासतेय्यौ ॥१०॥

चिनोति योऽग्निं भुवि नाचिकेतं स याति देहेन सहान्यलोकान् ।
वेदोदिता नः परलोकसत्ता वैज्ञानिकैरप्युररीकृतैषा ॥११॥

लोका इयन्तस्तपना इयन्तः कथं महाकाशमनुप्रविष्टाः ।
तेषां च किं भूतभवद्भविष्यं विज्ञानिनामत्र मतं विभिन्नम् ॥१२॥

यथास्थितं विश्वमुवाच कश्चित् विस्फुट्य विस्तारि च कश्चिदन्यः।
स्वतोऽपचाय्यप्युपचायि कश्चित् अन्तर्विकारेष्वपि सत्स्वभीक्ष्णम् ॥१३॥

आवर्तवन्ति प्रचुरीभवन्ति कृष्णानि रन्ध्राणि महान्तरिक्षे ।
तेभ्यस्समुद्भूय लयं च तेषु यान्ति प्रपञ्चा इति केचिदाहुः ॥१४॥

ब्रह्मोद्भवं ब्रह्मणि लीयमानं ब्रह्माण्डमेतत् प्रवदन्ति वेदाः ।
सावर्तगर्तं दिवि कृष्णरन्ध्रं किं ब्रह्मनाभिस्ततविश्वयोनिः ॥१५॥

क्षीरोदधिः किं दिवि शुक्लिमाऽसौ आकाशगंगा किमु नाकवीथी ।
यः श्वेतरश्मिश्रुतिवर्ण्यमानस्स एव विज्ञाननिरूपितः किम् ॥१६॥

लोका इमे सन्त्यखिलेऽप्यनित्याः कल्पायुषो धातृसमायुषो वा ।
वेदैर्यदेतत्प्रतिपादितं नः वैज्ञानिकैरभ्युपपद्यते तत् ॥१७॥

चतुर्युगानां च सहस्रमेकं विधेरहस्तन्मितमेकरात्रम् ।
विधेरहोरात्रमितश्च कल्पो विधातुरायुश्शतवर्षमेवम् ॥१८॥

प्रत्येककल्पस्य पुनर्णवस्य दिनायमानस्य निजायुषोऽसौ ।
आदौ सृजन्नण्डमिदं समस्तं अन्ते विरिञ्चो नयति प्रणाशम् ॥१९॥

स एकलोकः परमात्मनो यः यदेव विष्णोः परमं पदं तत् ।
न यत्र सूर्यो न च भाति चन्द्रो यमेव भान्तं ह्यनुभाति सर्वम् ॥२०॥

विज्ञानिभिर्नैष गवेषणेन निरूपितो नापि निरूपणार्हः ।
अनन्यभक्तैर्भगवत्प्रसादात् ध्यानेन साक्षात्क्रियते स कैश्चित् ॥२१॥

नारायणे ब्रह्म स वासुदेवो विष्णुर्जगन्नाथमहाप्रभुश्च ।
वैकुण्ठसञ्ज्ञे परमे पदे यः श्रिया समेतस्सततं समिन्धे ॥२२॥

स सूर्यकोटिद्युतिरस्ति सूर्ये विराजमानो विधिना श्रिया च ।
यं लोकसाक्षीति वदन्ति सूर्यं तस्यापि साक्षी स हि सर्वसाक्षी ॥२३॥

सूर्येण लोकस्य महोपकारः सूर्यं विना स्यादभितोऽन्धकारः ।
आलोकवर्षोद्भिद आयुरूर्जाः प्राणाश्च सर्वे तदधीनभूताः ॥२४॥

पुमान् परस्तिष्ठति सूर्यमध्ये यस्माद्रयान्नित्यमुदित्य सत्यः ।
आरोग्यमायुश्श्रियमात्मबोधं स्वोपासकेभ्यस्स ददाति सूर्यः ॥२५॥

वयश्चतुष्कोटिशताब्दमस्य यदेव पृथ्व्या इति वक्ति वेदः ।
वैज्ञानिकोऽप्यद्य गवेषयित्वा तयोर्वयस्तावददिति ब्रवीति ॥२६॥

निश्शङ्कमग्निर्निखिलः पृथिव्यां सावित्र एवेति वदन्ति वेदाः ।
गवेषयित्वा बहुभिस्तदेतत् वैज्ञानिकैरभ्युपपद्यतेऽद्य ॥२७॥

प्रत्यूषकाले भगवानुदित्य प्राच्यामिनो भ्राज इतीरितो नः ।
प्रदिश्य नश्शक्तिमपि प्रकाशं प्रपद्यते सायमितः प्रतीचीम् ॥२८॥

एवं प्रवृत्तस्य हिते जनानां एतावताऽर्धं गलितं तदायुः ।
ज्योतिर्विदः कल्पमितं तदीयं वदन्ति कोट्यष्टशताब्दमायुः ॥२९॥

आजन्मनो वर्णयितुं तदीयं आश्चर्यदं कृत्यमहं यतिष्ये ।
आकर्ण्य यद्विश्वसिमि प्रकामं आनन्दमद्धानुभविष्यथेति ॥३०॥

क्षीराब्धिमध्ये भुजगे शयानो नारायणस्स्त्रष्टुमियेष विश्वम् ।
सङ्कल्पमात्रेण तदीयनाभेस्संजातमेकं नलिनं सनालम् ॥३१॥

ततस्स्वयम्भूर्वदनैश्चतुर्भिस्तस्याविरासीत्कमलस्य मध्ये ।
अध्यापयामास तमादिदेवश्श्रुतीस्स्वयं सृष्टिकृते चतस्त्रः ॥३२॥

अथ प्रपञ्चं स सृजन् स्वयम्भूः अप्स्वेव पूर्वं जनितासु तप्त्वा ।
अनेकसूर्यप्रतिमप्रकाशं अण्डं महत्स्वर्णमयं ससर्ज ॥३३॥

स्वयं तदाभ्यन्तरतस्स वेधाः द्विधाविधायाण्डमथोत्पपात ।
सूर्योऽन्तरिक्षं पृथिवी ग्रहाश्च चन्द्रस्तथोल्कास्तत उद्बभूवुः ॥३४॥

वैज्ञानिका अप्यवदन्निदं नः तेजोमयाद्विस्फुटितात्किलाण्डात् ।
सूर्यः प्रजज्ञे ग्रहमण्डलेन सोपग्रहस्सन् सहधूमकेतुः ॥३५॥

स प्राणिदेहान्यसृजद्विधाता द्रागेव सृष्टैः किल पञ्चभूतैः ।
ब्रवीति विज्ञानिगवेषकोऽपि न पञ्चभूतानि विनाऽस्ति सृष्टिः ॥३६॥

सृष्टस्य लोकस्य च धारणाय जीवप्रवेशेन शरीरमध्ये ।
जीवप्रकृत्या निजयैव विश्वं बिभ्रत्परं ब्रह्म विराट् बभूव ॥३७॥

नेत्राद्विराजस्तपनः प्रपेदे जीवं स यं सूर्य इति ब्रुवन्ति ।
परः पुमान् ब्रह्मरमासमेतो यदीयमध्ये स्वयमेव भाति ॥३८॥

द्रागेव धाता मनसा ससर्ज प्रजापतीनत्रिमरीचिमुख्यान् ।
स्वयं विराजो मनुरुद्बभूव स्वायम्भुवं यं मनुमामनन्ति ॥३९॥

मरीचिसूनोरथ कश्यपस्य दाक्षीष्वदित्यादिषु संबभूवुः ।
देवासुरा नागसुपर्णगृध्राः अनेकरूपाः पशुपक्षिणश्च ॥४०॥

पृथक् प्रयत्नेन मनुष्यमन्ते प्रजापतिर्मैथुनिनं ससर्ज ।
देहेऽस्य देवास्सकले प्रविष्टाः आत्मा धृतस्सन् परमात्मना च ॥४१॥

सूर्यश्शरीरेऽस्य हि पिंगलाख्यां नाडीमधिष्ठाय ददाति शक्तिम् ।
आमाशयो धीर्हृदयं शिरोऽस्थि तस्य प्रसादेन हि यान्ति दार्ढ्यम् ॥४२॥

युद्धे पिनाकेन पुराऽन्धकेन विद्धश्शिवोऽस्याऽपययौ च सर्पः ।
तदा स्थितोऽयं निबिडेऽन्धकारे आदित्यमालोककृतेऽस्तुवीत ॥४३॥

अथाष्टमूर्तिर्मिहिरोपदिष्टश्शूलं प्रयुज्यान्धकमभ्यजैष्ट ।
तुष्टस्स्तवैः तं पुनराततान भृङ्गीरटीत्येकगणाधिपं सः ॥४४॥

सूर्यस्तुतिं तां गिरिशप्रणीतां पठन् विजेता समरे नरोऽरीन् ।
नैकैर्वृतोऽप्यप्रतिकाररोगैः मुक्तस्स मुक्तामयतां लभेत ॥४५॥

अण्डस्थितस्यैव दिवाकरस्य रूपाभिधायां रुचिरप्रभायाम् ।
दाक्ष्यां बभूवुर्बहुपुत्रपुत्र्यः वैवस्वतस्तेषु मनुस्तथैकः ॥४६॥

ईक्ष्वाकुणा राजकुलं पृथिव्यां संस्थापयामास मनुस्सुतेन ।
मनोर्हि मन्वन्तर एष भूमौ वैवस्वतस्य प्रचलत्यमुष्य ॥४७॥

विवस्वते कृष्ण उवाच योगं स तं विवस्वान् मनवे दिदेश ।
इक्ष्वाकवे तं मनुरात्मजाय कालेन नष्टो महता स योगः ॥४८॥

पुनश्च तं भारतयुद्धरंगे कृष्णोऽर्जुनायोपदिदेश योगम् ।
विवृत्य गीतामधि बोध्यमानं योगं जनस्संप्रति शिक्षते तम् ॥४९॥

इक्ष्वाकुसंस्थापितराजवंशो लोकेऽभवद्विश्रुतसूर्यवंशः ।
विष्णुर्हि रामोऽवततार यत्र त्रेतायुगे रावणसूदनाय ॥५०॥

रवेर्हि युद्धे विजयाय रामो जजाप स स्तोत्रमगस्त्यदत्तम् ।
ततो दशास्यं समरे विजिग्ये आदित्यपूजाफलमूर्जयन्नः ॥५१॥

रूपां स दाक्षीमुदुवाह सूर्यः कथं तदीयाः कति पुत्रपुत्र्यः ।
कत्यन्यपत्न्यो द्युमणेस्सुता वा तत्सर्वमाख्यामि सुविस्तरेण ॥५२॥

सुरासुराणां समरे पुराऽयं साहाय्यहेतोस्तपनस्सुराणाम् ।
धृतव्रतायाः भगवानदित्याः अथाण्डमंशेन विवेश देव्याः ॥५३॥

तस्या व्रतोपोषितकर्शितायाः अण्डं च्युतं पश्यति कश्यपेऽभूत् ।
मृताण्डतश्चण्डकरोऽथ जज्ञे मार्तण्ड इत्याह्वयवान् विवस्वान् ॥५४॥

उदेतवानित्युदराददित्याः आदित्यनामाऽपि स विश्रुतोऽभूत् ।
प्रदह्य दैत्यान्निजतेजसैव दिवौकसामेष जयं दिदेश ॥५५॥

अण्डस्थितोऽभूदधिसप्तमीं यत् अस्पष्टरूपो नितरां स चण्डः ।
अतो विदुर्जन्मतिथिं तदीयां अधीतशास्त्रा इह सप्तमीति ॥५६॥

अण्डस्थितस्सन् व्यवहत्स कन्यां दक्षस्य रूपेत्यतिरम्यरूपाम् ।
अण्डस्थ एवाजनयत्स तस्यां मनुं प्रभातं यमुनां यमञ्च ॥५७॥

रूपैव संज्ञा च सुवर्चलेति राज्ञी प्रभा द्यौरिति चाप्यवेता ।
छाया तदीयाप्यथ निक्षुभेति महीति साऽजायत लब्धनाम्नी ॥५८॥

पत्युस्त्विषा प्लुष्टतनुः प्रभाऽपि छायां निजां स्वस्य पदे निवेश्य।
त्यक्त्वा स्वरूपं बडवाऽथ भूत्वा कुरूनुपेता कुरुते तपस्स्म ॥५९॥

जायां परित्यज्य गतामजानन् छायां हि रूपेति स मन्यमानः ।
मार्ताण्ड उद्भावयति स्म तस्यां सावर्णिमन्दौ तपतीं च पुत्रीम् ॥६०॥

छाया न वात्सल्यमदर्शयत्सा वैमातृभावात् यमुनायमाभ्याम् ।
मिथो विवादैर्यमुनातपत्यौ ते निम्नगे संभवतस्स्म सद्यः ॥६१॥

वैमातृभावं जननीसपत्न्याः वैवस्वतो वीक्ष्य यमः क्रुधा ताम् ।
आहन्तुमुत्थापयति स्म पादं छाया ततस्तं कुपिता शशाप ॥६२॥

मां त्वं यतो मातृवदर्हणीयां आहन्तुमुत्थापितवान् स्वपादम् ।
बीभत्सकर्मा भविताऽसि पादः न्यस्तः क्षितौ ते कृमिभक्षितस्स्यात् ॥६३॥

मध्ये स्वपुत्र्योर्यमुनातपत्योः वात्सल्यभेदं यममन्दयोश्च ।
सूर्यस्स्वपत्न्या क्रियमाणमीक्ष्य तस्यै कुपित्वा परुषं बभाषे ॥६४॥

छाया न रूपेति यमाद्विदित्वा भूयः क्रुधा तां तपनश्शशाप ।
अद्य प्रभृत्यन्तरिता निजान्तश्छायाऽस्तु जन्तोर्न बहिश्चरीति ॥६५॥

स सान्त्वयामास तयाऽभिशप्तं यमं क्षितौ तिष्ठतु ते न पादः ।
आदाय तस्माद्रुधिरं च मांसं कीटाश्च भूमिं क्रिमयो व्रजन्तु ॥६६॥

गंगेव पूता यमुने भव त्वं प्राप्य प्रयागं मिलिता तयेति ।
पुण्यं नदत्वं प्रतिलभ्य पृथ्व्यां त्वं नर्मदावत् तपति स्त्रवेति ॥६७॥

मिथो विवादैर्भुवि निम्नगात्वं संप्राप्तवत्यौ यमुनातपत्यौ ।
अपत्यवात्सल्यवशादथैवं तौ सान्त्वयामास सहस्त्ररश्मिः ॥६८॥

रूपामपश्यन् क्व नु सा गतेति पप्रच्छ दक्षं श्वशुरं प्रभेशः ।
पतिं परित्यज्य तपश्चरन्ती कुरून् गता सेति तमाह दक्षः ॥६९॥

त्वत्तेजसा प्लुष्टतनुः प्रकामं रूपं तव द्रष्टुमशक्नुवाना ।
रूपा वहन्ती बडवेव रूपं गता कुरूनद्य तपस्यतीति ॥७०॥

स्पष्टानि ते लोचनगोचराणि भवेयुरंगानि यदि प्रभेश ।
तापः प्रचण्डो भविता न ते चेत् रूपा तदा त्वामभिपत्स्यतीति ॥७१॥

यदीच्छसि त्वं यदि वेदनाञ्च सहिष्यसे भास्कर शातयित्वा ।
तेजः प्रचण्डं तव विश्वकर्मा प्रादुःकरिष्यत्यभिगम्यरूपम् ॥७२॥

भूयः प्रियासंगमलालसस्सन् पूषा तथाऽस्त्वित्युररीचकार ।
रुजं सहिष्ये मम विश्वकर्मा प्रशात्य तेजः प्रददातु रूपम् ॥७३॥

दक्षोदितस्तत्क्षणमेव तक्षा शाणेन तेजो बहु शातयित्वा ।
चूडादि पादान्तमिनस्य रूपं अयत्नसेव्यं स्म ततो व्यनक्ति ॥७४॥

सूर्यस्य तेनाभवदप्रसह्या रुजाऽथ तक्षा व्यपनेतुमेनाम् ।
आभूष्य भानुं करवीरपुष्पैः लिलेप रक्तेन स चन्दनेन ॥७५॥

अलंकृतस्तत् करवीरपुष्पैः रक्तेन लिप्तस्त्वचि चन्दनेन ।
प्रसृत्वरैर्गुग्गुलुधूपधूमैः पूजासु पूषा भवति प्रसन्नः ॥७६॥

तत्तेजसश्शातनतोऽवशिष्टकलास्वथैका किल षोडशीषु ।
त्वष्टाऽऽदधे त्याजिततेजसोंऽशैः शूलं त्रिनेत्रस्य हरेश्च चक्रम् ॥७७॥

सौम्येन रूपेण कुरूनुपेत्य संजातकामोऽथ सहस्त्ररश्मिः ।
धृताश्वरूपां दयितां विलोक्य धृत्वाऽश्वरूपं सहसाऽभ्यधावत् ॥७८॥

आशंकमाना परपूरुषं तं व्यावृत्त्य तस्थावथ संमुखी सा ।
आरूढगात्रो रविरप्यमुष्याः आस्ये हि रेतस्स्खलयाञ्चकार ॥७९॥

मुखस्य तस्या विवरं प्रविश्य तेजो रवेर्दिव्यममोघवीर्यम् ।
नासापुटाभ्यामथ निर्जगाम पुत्रौ प्रसूतौ यत आश्विनेयौ ॥८०॥

तावाश्विनेयौ सुकुमाररूपौ तेजस्विनावप्रतिमप्रभावौ ।
विद्यां विदित्वौषधभैषजानां बभूवतुर्देवगणस्य वैद्यौ ॥८१॥

अन्ते रतेस्संजनितस्सुतोऽस्यां रेवन्तनामेति स रेतसोऽन्ते ।
जहार यो भानुमतोऽष्टमाश्वं पश्चादभूद्भानुमतोऽश्वपालः ॥८२॥

सप्तम्युदेतस्स हि सप्तसप्तिः सप्तम्युपास्यस्तत एव सर्वैः ।
तत्सप्तमीकल्पविधिं विभिन्नं वेदाः पुराणानि च वर्णयन्ति ॥८३॥

तं याज्ञवल्क्याय पुरा विरिञ्चः सूर्यप्रभावं प्रकटीचकार ।
स्वयं रविं देवमयं स आह गंगा यथा तीर्थमयी तथेति ॥८४॥

ब्रह्मा च विष्णुश्च शिवश्च पूर्वं अहंकृतेः कारणतोऽन्धकारे ।
मग्ना विवस्वन्तमुपास्य भेजुरालोकमित्यस्ति कथा पुराणे ॥८५॥

स्वव्योमपूजाकरणेन लभ्या शक्तिस्तुरीयेति रविर्बभाषे ।
पूजाविधिं स्वस्य च विस्तरेण स्वयं त्रिमूर्तीस्स उपादिदेश ॥८६॥

सर्वेऽपि देवा ऋषयोऽपि सर्वे सूर्ये च सूर्यं परितो निविष्टाः ।
रुद्रो ललाटे हृदि धातृविष्णू दिशामधीशाश्च विदिक्षु दिक्षु ॥८७॥

लूत्वा पुरा ब्रह्मण एकमास्यं स ब्रह्महत्याविकलश्शिवोऽभूत् ।
यदा तदा देवमुपास्य सूर्यं बभूव सद्यो वृजिनाद्विमुक्तः ॥८८॥

यत्पूजनादेव हरिर्हरित्वं यत्पूजनादेव शिवश्शिवत्वम् ।
यत्पूजनादेव विधिर्विधित्वं इन्द्रत्वमिन्द्रोऽप्यगमन्नमोघम् ॥८९॥

द्रागब्रह्मवादिन्यभिशापहेतोः रुग्णस्सुपर्णोऽजनि हीनपर्णः ।
भ्राताऽरुणश्शान्तिमधात्तदर्थं सूर्यार्चनैः पक्ष्मतस्स लेभे ॥९०॥

स दिण्डिनामा गणनायकोऽपि प्राग् ब्रह्महत्यादुरितेन लिप्तः ।
सूर्यं समभ्यर्च्य विधूतपापः आसीत् क्रियायोगपरस्तदुक्त्या ॥९१॥

पूतः क्रियायोगवशेन जातस्स ब्रह्मलोकं समुपेत्य दिण्डी ।
सूर्यस्य पूजामवगम्य धातुः प्रधानसूर्यानुचरो बभूव ॥९२॥
साक्षात्कृतस्सांब पुरा स्वलोके सूर्यो मयेत्याह स नारदस्तम् ।
देवैस्समस्तैस्सहितोऽप्सरोभिः गन्धर्वयक्षोरगराक्षसैश्च ॥९३॥

मूर्ता ऋचस्सामयजुस्समेताः स्थितास्समन्तादृषयस्स्तुवन्तः ।
तिस्रश्च सन्ध्या अपि मूर्तिमत्यो वर्णैस्स्थिताः खल्वरुणेन्दुपद्माः ॥९४॥

आदित्यरुद्रा वसवोऽश्विनौ च शक्रश्च तिष्ठन्ति तमर्चयन्तः ।
सारथ्यमर्कस्य करोत्यनूरुः रथे तमास्थाप्य स कालरूपे ॥९५॥

एकं हि तत्सूर्यरथस्य चक्रं छन्दस्स्वरूपास्तुरगाश्च सप्त ।
भिन्नैर्निजैर्नामभिरप्यमर्त्याः स्थिता रथं ते परिवार्य सर्वे ॥९६॥

द्वे तस्य भार्ये जयतस्समीपे रूपेति नाम्नी प्रथमाऽऽप्तसंज्ञा ।
राज्ञी प्रभा द्यौश्च सुवर्चला सा छाया मही नाम च निक्षुभाऽन्या ॥९७॥

तल्लेखकः पिंगलसंज्ञ एकः दण्डार्थमुत्तिष्ठति नायकोऽग्रे ।
पक्षी च कल्माष इति स्थितौ द्वौ दौवारिकौ दिण्डिसमेतभूतौ ॥९८॥

गभस्तिभान्वंशुमयूखनाडीगोहेत्यभीषूस्रमरीचयश्च ।
पादः करोऽर्चिर्घनदीधिती च सुपर्णसाध्यौ किरणो वसुश्च ॥९९॥

रश्मिस्तथा नाम सहस्ररश्मेः भवन्ति ये विंशतिरश्मयोऽमी ।
ते शीतवर्षातपहेतुभूताः पृथक् पृथक् वेत्ति विचक्षणस्तान् ॥१००॥

प्राक् कौथुमिर्नाम बभूव विप्रो यो ब्रह्महत्यावशतश्शुशोच ।
पित्रोपदिष्टेन पथा स पश्चात् उपास्य सूर्यं दुरितादमोचि ॥१०१॥

विभिन्नपूजां प्रतिसप्तमीह निर्वर्त्य सप्तस्वपि सप्तमीषु ।
भुक्त्वा मनुष्यो भुवि देवभोगान् अन्ते विशत्यर्यमलोकमेव ॥१०२॥

सूर्यस्य पूजामपि पूजाकाणां आचारमस्य प्रियपुष्पवृक्षान् ।
हृद्यं च नैवेद्यममुष्य सर्वं अस्मत्पुराणान्युपवर्णयन्ति ॥१०३॥

गुडेन पूपेन च मोदकेन स पायसेनारुणवर्णभाजा ।
घृतेन नैवेद्यकृता भृतेन तृप्तिं परां विन्दति रश्मिमाली ॥१०४॥

लब्धाधिकारास्तपनार्चनासु ते भोजका भानुमदंगजाताः ।
दानं ग्रहीतुं शुचि भोजनं च त एव योग्याः न परे तदर्हाः ॥१०५॥

गृहस्थधर्मा जनकादयोऽपि ते ब्रह्मचर्यापरवालखिल्याः ।
वने स्थिता व्यासमुखर्षयोऽपि प्रव्राजकाश्चापि भजन्ति सूर्यम् ॥१०६॥

शुकोऽपि योगे निरतस्सदैव व्यासात्मजो ब्रह्मणि लीनचित्तः।
पुनर्भवं निर्णुदति स्म पीत्वा सहस्रभानोः किरणं स्वयं सः ॥१०७॥

ओंकारपूर्वं मनसैव जप्तो मन्त्रः खषोल्काय नमः किलेति ।
स कामितार्थानखिलान् प्रसूते तपोधनानामुपदेश एषः ॥१०८॥

तदात्मजान् भोजकनामविप्रान् विनाऽपि पूजास्वधिकारभाजः।
भवन्ति केचिन्मगनामविप्राः ये निक्षुभायां मिहिरेण जाताः ॥१०९॥

ये भोजयन्तीह सहस्त्ररश्मिं भजन्ति ते भोजकनामधेयम् ।
रविस्स्वयं प्रीतमना ब्रवीति निजस्वहारी स हि भोजको मे ॥११०॥

मकारतस्सूच्यत एव भानुः संपूज्य गच्छन्ति यतस्तमेव ।
ततो मगा इत्युपलब्धसंज्ञाः तत्सेवकास्तस्य हि पुत्रभूताः ॥१११॥

स्थानानि जम्ब्वाख्यमहान्तरीपे त्रीण्येव भानोर्नितरां प्रियाणि ।
तेष्वाद्यमस्तीन्द्रवनाभिधानं मुण्डीरकालप्रियनामकेऽन्ये ॥११२॥

तच्चन्द्रभागातटसंनिवेशे पुरं पुरा साम्बविनिर्मितं यत् ।
तत्रार्यमा द्वादशभागयुक्तो मित्रस्सदा तिष्ठति रक्षितुं नः ॥११३॥

उद्यन्तमादित्यमुपास्त इन्द्रः मध्याह्नकाले यम ईडते तम् ।
सायं स पाशी विधुरर्धरात्रे निशाक्षयेष्वर्चति तं त्रिमूर्तिः ॥११४॥

भानोर्हरिर्दक्षिणरश्मिजातः ब्रह्मा पुनर्वाममयूखजन्मा ।
रुद्रो ललाटादुदितस्त्रिनेत्रः त्रिमूर्तिरेवं समजायतार्कात् ॥११५॥

दिवाकरो भास्करचित्रभानू मार्ताण्डभानू मिहिरार्कसूर्याः ।
प्रतापनादित्यसवित्रभिख्याः रविश्च साधारणतो दश द्वे ॥११६॥

पुराऽऽञ्जनेयः पवनस्य पुत्रः बालोऽपि पक्वं फलमित्युदेतम् ।
उत्पत्य सूर्यं गगने ग्रहीष्णुः मध्यागतं राहुमपाचकर्ष ॥११७॥

आकर्ण्य राहोश्चकितात्कथां तां वज्रेण शक्रस्तमथाजघान ।
भूमौ ततो भग्नहनुर्निपत्य स मूर्च्छितस्तेन चुकोप वायुः ॥११८॥

वायुर्न वाति स्म जगत् समस्तं स्तब्धं बभूवाथ विधातृवाचा ।
तं प्रीणयन्ति स्म सुरा अशेषेः वरान् बहून् वायुसुताय दत्वा ॥११९॥

सूर्योऽपि काले मम शिष्यभूतो गृह्णातु विद्यामयमित्यवोचत् ।
परं मयाऽयं त्वनुधावितव्यो यतश्चलन्नेव हि शिक्षयेयम् ॥१२०॥

जग्राह विद्याः हनुमानशेषाः सूर्यात्तमेवानुगतो जवेन ।
भूत्वा नवव्याकरणेषु विद्वान् स श्लाघितोऽजायत राघवेण ॥१२१॥

इक्ष्वाकुवंशे जनितो नरेन्द्रो दिलीपसंज्ञो रघुरस्य पुत्रः ।
अजस्ततः पङ्क्तिरथोऽस्य पुत्रः यस्यैव पुत्रोऽवततार रामः ॥१२२॥

साह्याय यस्यर्क्षरजोऽभिधानकपीन्द्रपत्न्यां कृतवालिनाम्नः ।
इन्द्रात्मजस्यावरजं विवस्वान् सुग्रीवसंज्ञं जनयांबभूव ॥१२३॥

मित्रस्य पुत्रः कृतवालिवैरः रामस्य मित्रं परमं स जातः ।
रामप्रसादात्कपिराज्यमाप्य हनूमता मार्गयति स्म सीताम् ॥१२४॥

युद्धाय रामस्य दशाननेन जगाम कर्षन् महतीं कपीनाम् ।
सेनां स लंकामवधीच्च योधान् रक्षःपतेः रामजयाय नैकान् ॥१२५॥

एवं स्ववंशप्रभवस्य सूर्यः पुत्रेण रामस्य चकार साह्यम् ।
नारायणस्यैव परावरस्य कृतावतारस्य कृते कृतं तत् ॥१२६॥

दुर्वाससः प्राप्तवरां स्तुवन्तीं मन्त्रेण कुन्तीं नरदेवकन्याम् ।
स्वं प्रीणयन्तीं स्वयमेव गर्भं स द्वापरे धारयति स्म सूर्यः ॥१२७॥

भीता ततोऽजायत कुन्त्यनूढा गर्भेण कौलीनकृता नितान्तम् ।
सा जातमात्रे सति मित्रपुत्रे गंगामधि प्लावयति स्म पेट्याम् ॥१२८॥

पेटीं स राधापतिरेकसूतः प्रापापगाथामवगाहमानः ।
भूत्वा स बाल्ये वसुषेणानामा पश्चादभूत् कर्ण इति प्रसिद्धः ॥१२९॥

स सूर्यपुत्र कवचेन हेम्नः हेम्नस्सहाजायत कुण्डलाभ्याम् ।
पितुः प्रभावेण बभूव जातः एवं रिपूणां समरेष्ववध्यः ॥१३०॥

तस्याभ्यसूयोरथ पाण्डुपुत्रान् विशिष्य भीमं च तमर्जुनं च ।
दुर्योधनस्यैष सखा बभूव युद्धेऽपि तस्यैव स पक्षपाती ॥१३१॥

ब्रह्मास्त्रविद्यामुपलब्धुकामो द्रोणेन सूतस्य सुतस्य कर्णः ।
अक्षत्रमब्राह्मणमस्त्रविद्यां तां शिक्षये नेत्यपसारितोऽभूत् ॥१३२॥

कर्णस्ततो भार्गवराममेत्य स्वं ब्राह्मणं भार्गवगोत्रमुक्त्वा ।
ब्रह्मास्त्रविद्यां विधिवद्गृहीत्वा शस्त्रेषु सोऽजायत पारदृश्वा ॥१३३॥

रामः कदाचिच्छ्रमविश्रमार्थं अशेत कर्णोरुकृतोपधानः ।
कृमिस्तदा कश्चन मांसभोजी कर्णारुदेशं व्यथयाञ्चकार ॥१३४॥

क्षतक्षरद्रक्तसमुक्षणेन सद्यः प्रबुद्धस्स बभूव रामः ।
नत्वा कृमिस्तं धृतदिव्यगात्रो ययौ निजां शापकथामथोक्त्वा ॥१३५॥

मांसाशिनो दारुणराक्षसस्य कृमेर्व्यथां कोऽपि निजे शरीरे ।
क्षन्तुं न शक्तो द्विज इत्यथैनं ब्रूहीति सत्यं निदिदेश रामः ॥१३६॥

कर्णस्तु भीतस्तमुवाच रामं सत्यं गुरो सूतसुतोऽहमस्मि ।
शशाप रामो युधि नेदमस्त्रं स्मरिष्यसि त्वं निजजीवितान्ते ॥१३७॥

स एकदा ब्राह्मणहोमधेनुं जघान कर्णस्स्वधनुश्शरेण ।
अज्ञानहत्येत्यनुनीय विप्रं स निष्क्रयं नेतुमुवाच गोभिः ॥१३८॥

स ब्रह्मवादी बहुशोऽनुनीतः तं निष्क्रयं नेतुमनीहमानः ।
शशाप कर्णं तव मृत्युकाले भूमिर्ग्रसेतेति रथस्य चक्रम् ॥१३९॥

कर्णो भवन्विश्रुतदानवीरः पित्रोपदिष्टोऽपि स युद्धतः प्राक् ।
स्वे कुण्डले स्वं कवचं निकृत्त्य ददौ मघोने कृतयाचनाय ॥१४०॥

प्राप्येन्द्रतश्शक्तिमरातिहन्त्रीं तथाऽश्वसेनाद्भुजगाच्च साह्यम् ।
तमर्जुनं नैव शशाक हन्तुं युद्धे स कृष्णेन कृताभिरक्षम् ॥१४१॥

रामस्य शापादथ विस्मृतास्त्रः विप्रस्य शापाद्रथचक्रमाजौ ।
उद्धारयन् पंकगतं स जघ्ने कृष्णोपदिष्टेन पथाऽर्जुनेन ॥१४२॥

कर्णस्य संस्कारमतो गतासोः अबान्धवत्वाज्जगदेकबन्धुः ।
आदित्यभूतोऽन्यतमस्स कृष्णः कर्णप्रयागेऽकुरुतेत्युदन्तः ॥१४३॥

कृष्णस्य साम्बाभिधपुत्र आसीत् कृष्णेन योऽजायत जाम्बवत्याम् ।
दृप्तस्स रूपेण च यौवनेन पूज्येषु भूयो विनयेन हीनः ॥१४४॥

स द्वारकामागतमेकवारं रूपेण वक्रं बहुधाऽभिनीय ।
दुर्वाससं कोपयति स्म साम्बः तच्छापतः कुष्ठमवाप रोगम् ॥१४५॥

अन्या पुराणेऽस्ति कथाऽपि काचित् तं रूपदृप्तं किल नारदर्षिः ।
दृष्ट्वा विनेतुं तमुपायमेकं कृष्णोपजापाय विचिन्त्य चक्रे ॥१४६॥

श्रुत्वोपजापं मुनिनारदस्य स्वान्तःपुरस्त्रैणरतिं स साम्बे ।
निदर्शनं प्राप्य शशाप कृष्णः साम्बं लभेता इति कुष्ठरोगम् ॥१४७॥

कुष्ठेन रोगेण स पीडितस्सन् कृष्णाय पुत्रो विगतावलेपः ।
साम्बस्स्वतातं समुपेत्य कृष्णं अयाचतोपायमरोगतायाः ॥१४८॥

कृष्णस्ततस्साम्बमुपादिदेश तेजोमयं देवमयं ज्वलन्तम् ।
एकाग्रभूतो निजरोगशान्त्यै दिवाकरं त्वं परिपूजयेति ॥१४९॥

कृतोपदेशो मुनिनारदेन स चन्द्रभागातटमेत्य साम्बः ।
स्थिरासनोऽनन्यमना दिनेशं ध्यायन् सुदीर्घं तप आचचार ॥१५०॥

पूजाविधिं स्वाज्जनकाद्विदित्वा स पूजयामास सहस्त्ररश्मिम् ।
तत्पूजया तृप्तिमुपेत्य काले तस्याग्र आविर्भवति स्म सूर्यः ॥१५१॥

स रोगशान्तिं प्रतिलभ्य पूष्णः पूर्वाधिकां संविदमाप साम्बः ।
परन्तु पूज्येषु विनीतवेषः सूर्ये विशिष्याहितभक्तिरासीत् ॥१५२॥

सूर्यस्य पूजा भवतात्सदेति स चन्द्रभागातट आततान ।
पुरं प्रतिष्ठाप्य नवं यथावत् तन्मन्दिरं चित्रविचित्रमेकम् ॥१५३॥

प्रप्रच्छ विप्रैः भुविकैस्तु पूज्यः साम्बो विनीत्या तपनं स चाह ।
मत्पूजका भोजकनामविप्राः तांस्त्वं शकद्वीपत आनयेति ॥१५४॥

पूजा कृता भोजकनामविप्रैः हृद्या यतोऽतीव दिवाकरस्य ।
आनीय संस्थाप्य पुरे निजे तान् अर्कस्य पूजां तनुते स्म साम्बः ॥१५५॥

कोणार्कनाम्नि प्रथितेऽर्कधाम्नि देवालयो योऽस्ति सहस्रभानोः।
स्थाने हि तस्मिन् स्थितपूर्वमाहुः अर्कालयं साम्बकृतं स्थितिज्ञाः ॥१५६॥

आसीत्पुरा भूपतिरर्कभक्तः सत्राजिताख्यः प्रथितः पृथिव्याम् ।
स्वपूर्वजन्मन्ययमाप कृत्वा नृपत्वमर्कालयमार्जनानि ॥१५७॥

सत्राजिते भक्तवराय मित्रः स्यमन्तकं नाम मणिं दिदेश ।
अहन्यहन्यष्टसुवर्णभारान् यः पूजितः क्षामहरं प्रसूते ॥१५८॥

भ्राता प्रसेनो मणिमस्य धृत्वा कृष्णेन साकं मृगयामरण्ये ।
अटन् मृगेन्द्रेण हतोऽथ सिंहो हतो मणिर्जाम्बवता हृतश्च ॥१५९॥

पुत्राय स क्रीडनकीकृतस्सन् न्यस्तो मणिर्जाम्बवता गुहायाम् ।
जनापवादोऽजनि स प्रसेनः कृष्णेन मण्यर्थमहन्यतेति ॥१६०॥

अथापनेष्यन्नपवादमेनं विजित्य कृष्णो युधि जाम्बवन्तम् ।
स्यमन्तकं तं मणिमर्घहीनं आनीय सत्राजित आर्पयच्च ॥१६१॥

स्यमन्तकं प्राप्य ततः प्रहृष्टो मणिं स्वपुत्रीमपि सत्यभामाम् ।
कृष्णाय सत्राजिददात्परंतु भामामगृह्णान्न मणिं स कृष्णः ॥१६२॥

अक्रूरनाम्ना कृतवर्मनाम्ना द्वाभ्यां सखिभ्यां शतधन्वनामा ।
कृतोपदेशो मणिमाजहार निहत्य सत्राजितमेत्य सुप्तम् ॥१६३॥

वधेऽपि क्लृप्ते शतधन्वनोऽथ मणिस्स कृष्णेन न लभ्यते स्म ।
भीतेन कृष्णाच्छतधन्वना यत् न्यासीकृतोऽक्रूरकरे स आसीत् ॥१६४॥

दुर्भिक्षपीडां मुहुरीक्ष्य जातां मणिं तमक्रूरगतं विदित्वा ।
अक्रूरमास्थापयति स्म कृष्णः स द्वारवत्यां मणिनैव जुष्टम् ॥१६५॥

प्रत्यागतो द्वारवतीं तथाऽयं स्यमन्तको नाम मणिर्महार्घः ।
न तत्र दुर्भिक्षमुदेति नाधिः न व्याधिरीतिर्न कदाऽपि पुर्याम् ॥१६६॥

सूर्यप्रसादप्रतिलब्धभूम्नः स्यमन्तकाख्यस्य मणेः प्रभावः ।
न शक्यते वर्णयितुं वचोभिः तत्पूजनादीतिरपैति देशात् ॥१६७॥

युधिष्ठिरो द्यूतपराजयेन व्रजन् वनं सावरजस्सदारः ।
अशक्तभूतोऽनुचरद्विजानां आप्यायने निस्स्वतया शुशोच ॥१६८॥

शशाक तान् पोषयितुं न विप्रान् न वा परित्यक्तुमयं शशाक ।
अतो गुरुं धौम्यमपृच्छादार्त्तः स्वं संकटान्मोक्तुमुपायमेकम् ॥१६९॥

तमाह धौम्यो रविरेक एव स्वतेजसाऽद्भिश्च युतः पृथिव्याम् ।
अन्नं प्रजाभ्यः प्रजनय्य दाति तमेव तस्माच्छरणं व्रजेति ॥१७०॥

अष्टोत्तरं तस्य शतं स नाम्नां यथावदाख्यापयति स्म धौम्यः ।
आचम्य भूत्वा प्रयतश्शुचिश्च तुष्टाव संपूज्य युधिष्ठिरोऽर्कम् ॥१७१॥

ततः प्रसन्नस्तपनस्तमेवं उवाच ताम्रं पिठरं प्रदाय ।
अनेन चेद्वत्स्र्यति याज्ञसेनी स्यादल्पमप्यन्नमनन्तकल्पम् ॥१७२॥

उपासनापद्धतिरुष्णरश्मेः उक्ता पुरा वृत्रहने विधात्रा ।
उपादिशन्नारदमिन्द्र एतां उवाच धौम्याय स तां क्रमेण ॥१७३॥

अद्यापि भूत्वा प्रयतश्शुचिश्च यः कश्चिदर्चेत्तपनं मनुष्यः ।
स्तुतिं पठित्वाऽस्य युधिष्ठिरेण कृताम् स विन्देदखिलान्हि कामान् ॥१७४॥

श्रीमन्दिरेऽर्कस्य कदाचिदासीत् कामेन कामस्य निकर्षमिच्छोः ।
वादस्ततश्शिक्षयितुं दिनेशं कामः प्रतिज्ञां कलयाञ्चकार ॥१७५॥

स कामयामास हि चन्द्रभागानाम्नीं स्त्रियं मन्मथबाणविद्धः ।
परन्तु भीता चकमे न सा तं तदुष्णरश्मेरुपलभ्य तापम् ॥१७६॥

यावद्ग्रहीतुं यतते करेण तां चन्द्रभागां स सस्त्ररश्मिः ।
तावत्पतित्वाऽम्रियतांबुराशौ सा धाम्नि कोणार्क इति प्रसिद्धे ॥१७७॥

भूत्वाऽऽपगा सैव हि चन्द्रभागा सिन्धौ पतन्त्यत्र पुनाति लोकम् ।
यां सप्तमीमध्यवगाहमानाः विधूतपापाः किल माघमासे ॥१७८॥

कोणार्कधाम्नि प्रथिते हि पूष्णः सेव्यं शुभं मन्दिरमेकमस्ति ।
मार्तण्डदेवालय एवमेकः काश्मीरराज्येऽस्ति च गूर्जरे च ॥१७९॥

पुराणकाले भुवि सूर्यपूजा वितन्यमाना मनुजैर्बभूव ।
ताः ज्यामितौ न्यस्तशिला अनेकाः यूरोपदेशेष्विदमूर्जयन्ति ॥१८०॥

कोणार्कमार्ताण्डमुखेषु पूष्णः पूजाऽधुना न क्रियते यथाप्राक्।
सा च्छिन्नभिन्ना मिहिरस्य मूर्तिः संस्थापिता संप्रति भाति पुर्याम् ॥१८१॥

मयूरसंज्ञः कविरेव आसीत् स बाणभट्टस्य कवेस्सखाऽभूत् ।
श्रीहर्षनाम्नो नृपतेस्सभायां उभौ च तस्याभिमतावभूताम् ॥१८२॥

कन्यां स्वकीयां कमनीयरूपां स कामयामास कविर्मयूरः ।
तयाऽभिशप्तः कृतपापकर्मा कुष्ठेन रोगेण स पीडितोऽभूत् ॥१८३॥

स्वरोगमुक्त्यै रविमस्तुवीत स स्त्रग्धराछन्दसि निर्मितेन ।
ओजस्विना पद्यशतेन सद्यो रोगाद्विमुक्तोऽप्यभवन्मयूरः ॥१८४॥

भ्राजाभिधानो दिवि रोचमानस्सूर्योऽस्मदीयस्सकलैस्स सेव्यः ।
आरोग्यमायुर्द्रविणं यशश्च कुशाग्रबुद्धिं भुवि लब्धुकामैः ॥१८५॥

अष्टोत्तरं तस्य शतं च नाम्नां पठन् विशेषेण तु भानुवारे ।
पापाच्च रोगाच्च नरो विमुक्तो यशश्श्रियं पुत्रमवाप्य नन्देत् ॥१८६॥

आदित्यनाम्ना समधिष्ठितोऽर्कः आभाति तेजोमयपूरुषेण ।
यो द्वादशात्मा प्रतिमासभिन्नः विष्णुस्स्वयं तिष्ठति चैत्रमासे ॥१८७॥

आत्मा च सूर्यस्य तथाऽन्तरात्मा भूत्वा पुनर्द्वादशमासि विष्णुः ।
तमश्च मोहं च समं विनाश्य भूत्वा स विष्णुः किल चैत्रमासे॥१८८॥

ज्ञात्वा तदीयं कवचं च धृत्वा जप्त्वा तदष्टाक्षरमन्त्रराजम् ।
पुनस्तदेकाक्षरबीजमन्त्रं विन्देन्नरस्सिद्धिमनन्यलभ्याम् ॥१८९॥

आदित्यनामानि भवन्ति यानि श्रुतौ स्मृतौ द्वादश कीर्तितानि ।
तान्यत्र पद्ये पठितान्यधस्तात् जप्यानि पापापहराणि नित्यम् ॥१९०॥

धात्रर्यमत्वष्टृविवस्वदिन्द्राः पर्जन्यमित्रौ वरुणश्च पूषा ।
विष्णुर्भगोंऽशश्च दशेति च द्वे आदित्यनामान्यतिपावनानि ॥१९१॥

रथस्य भानोरतिविस्तृतस्य चक्रं तु संवत्सरसंज्ञमेकम् ।
प्रतिष्ठितं तच्च हि कालचक्रे कालस्य मानं तत एव साध्यम् ॥१९२॥

अनूरुरित्येव यथार्थनामा सूर्यस्य सूतो गरुडाग्रजन्मा ।
छन्दांसि सप्तास्य रथस्य युग्यास्सूतश्च ते चापरिवर्तितास्स्युः ॥१९३॥

अन्ये किलादित्यरथे निविष्टाः ते मासि मासे परिवर्तितास्स्युः ।
एवं स आदित्य ऋषिर्भुजङ्गः गन्धर्वरक्षोप्सरसश्च यक्षाः ॥१९४॥

चन्द्रं सुषुम्नाभिधसूर्यरश्मि-संतर्पणप्राप्तसुधाकरत्वम् ।
पिबन्ति कृष्णे त्रिदशाश्च पक्षे द्वेऽन्ते कले ते पितरः पिबन्ति ॥१९५॥

चन्द्रस्य पुष्टिस्तपनस्य रश्मेः इति प्रसिद्धो हि जनप्रवादः ।
विज्ञानिनोऽपीन्दुमिनेन दीप्तं आहुः श्रुतेरप्युररीकृतोऽर्थः ॥१९६॥

आनन्दमाप्तुं मधुविद्यया ते वस्वादिदेवाः परमर्षयश्च ।
सूर्ये विलग्ना मधुनः करण्डे तं स्वादयन्ते मधुपा यथा वा ॥१९७॥

सूर्ये निबद्धा उरवश्च लोकाः ध्रुवे निबद्धः परमेष सूर्यः ।
ध्रुवो निबद्धश्शिशुमारचक्रे ब्रह्मैव मूर्तं शिशुमारचक्रम् ॥१९८॥

तप्त्वा सुतो गाधिसुतश्चिराय गायत्रमन्त्रं सवितुर्ददर्श ।
येन त्रिसन्ध्यं जपितेन तुष्टस्सूर्यो धियं चोदयति स्वयं नः ॥१९९॥

गायत्र्यृगाम्नाययुतो मुखेऽह्नः सावित्र्युपेतो यजुषा च मध्ये ।
सरस्वतीसामयुतश्च सायं पुनाति पूषा भुवनं त्रिसन्ध्यम् ॥२००॥

गायत्रमन्त्रो नियमेन जप्यस्सावित्रमन्त्रश्च तथा त्रिसन्ध्यम् ।
जप्यस्स चाष्टाक्षरसूर्यमन्त्रः आदित्यपूर्वं हृदयं च पठ्यम् ॥२०१॥

एनः पुनानं सवितारमेनं एकेऽवगाढाः नियतं प्रभाते ।
एधिष्णवश्श्रेय उपेतुकामाः एवं प्रणम्य स्तुतिभिस्स्तुवन्ति ॥२०२॥

तेजोमयो वेदविदेष पूषा राजा ग्रहाणां तमसां निहन्ता ।
ओजो बलं वीर्यमरिप्रणाशं भ्राजो मयि प्रीतियुतो ददातु ॥२०३॥

अक्षय्यमिच्छन्ननिशं दिनेशं आरोग्यमायुस्तत आप्तुकामः ।
गायत्रमन्त्रेण सुपूतमर्घ्यं सन्ध्यासु विप्रोऽर्कमुदीक्ष्य दद्यात् ॥२०४॥

पितामहात्प्राप्तवरा अमन्दाः मन्देहसंज्ञा दिवि यातुधानाः ।
सन्ध्यासु घोराक्षयदेहभाजः इच्छन्ति ते खादितुमर्यमाणम् ॥२०५॥

गायत्रमन्त्रेण सह त्रिसन्ध्यं ऊर्ध्वं द्विजैः क्षिप्तमितोऽर्घ्यवारि ।
मन्देहपूर्वारुणनाम्नि . तत्तान् द्वीपे क्षिपत्याशु हि वज्रभूतम् ॥२०६॥

वेदैरशून्यस्त्रिभिरेधमानस्तेजोमयो देवमयो ग्रहेशः ।
आत्माधितिष्ठत्परमात्मदृश्यः परामृतार्थं प्रणिपत्य सेव्यः ॥२०७॥

पुरा सुधाभुक् सुरपङ्क्तिमध्ये विष्टस्य दैत्यस्य शिरो निकृत्तम्।
तद्राहुभूतं प्रतिदर्शमत्र निगीर्य चोद्गीर्य दुनोति सूर्यम् ॥२०८॥

पुण्यात्मनोऽयं नयति स्वधस्त्रैः भोगोपभोगाय सुवर्गलोकम्।
मुमुक्षवो योगिवराश्च मुक्त्यै मध्यं विदार्यास्य ततः प्रयान्ति ॥२०९॥

मरुस्थले वा मिहिराभितप्ते शुष्के स्थलेऽन्यत्र तु वा प्ररूढा ।
अर्काभिधा व्याधिनिवारणाय क्षमौषधिः काचन तद्गुणाढ्या ॥२१०॥

तथ्यानि विज्ञानि गवेषितानि द्रागेव वेदे प्रतिपादितानि ।
तथ्यानि वेदप्रतिपादितानि गवेषितव्यानि परं बहूनि ॥२११॥

प्रत्यक्षभूतः किल नाक एषः प्रत्यक्षभूतः किल देव एषः ।
प्रत्यक्षभूतः परमः किलैषः प्रत्यक्षभूतं नमतेनमेनम् ॥२१२॥

आनन्ददं स्यादिति बालकानां आम्नायविज्ञानसमन्वयेन ।
आदित्यवृत्तान्तमशेषमेवं आख्यत्कविस्सुन्दरराजनामा ॥२१३॥

ऋतुमञ्जरी

-श्री श्रीः सुन्दरराजः

श्रीवासराघवगुरुं विनयेन नत्वा
प्राचेतसं मुनिमपि प्रथमं कवीनाम् ।
प्राचः प्रवर्णितऋतूनपि कालिदास-
मुख्यान् करोमि कवितामृतुमञ्जरीति ॥१॥

भूगोलस्सूर्यगोलो द्वितयमपि निजाक्षोपरि भ्राम्यतीति
साचीभूयार्कमुर्वी भ्रमति परित इत्याह वैज्ञानिको नः ।
आरात्सूर्यं निजाक्षोपरि भवति दिवारात्रमुर्व्यां भ्रमन्त्यां
साचीभूय भ्रमन्त्यां परित इनमृतुर्जायतेऽस्यां विभिन्नः ॥२॥

भ्राम्यद्भूम्याः प्रदेशेष्विननिकटतमेषूज्जिहीने निदाघः
बाष्पीभूताब्धिपाथः कणपरिणमितैर्जृम्भति प्रावृडब्दैः ।
सूर्ये दूरं यियासौ शरदथ ऋतुरात् दूरतः पार्श्वमीयु-
ष्याकाशे किन्तु दूरं गतवति मिषतः पूष्णि हेमन्तशीतौ ॥३॥

नक्षत्रीभूय दूरे वियति विलसतां भास्वतां भास्वतो नः
ग्लावुल्काधूमकेतुप्रभृतिबहुविधोपग्रहाणां ग्रहाणाम् ।
प्रत्येकस्मिन् प्रपञ्चे भवति बहुविधं चक्रमेषां प्रभावैः
एवं षण्णामृतूणां भुवमधि चलितं चक्रमन्वब्दमेकम् ॥४॥

विज्ञानमाख्यदृतवः कथमुद्भवन्ति
वेदान्तिनोऽनृतमृतुं न्यगदन्नथैके ।
आनन्ददायिविविधाचरणैर्जनानां
रस्या अमी ऋतव इत्यवदन् कवीन्द्राः ॥५॥

परिपाकविनम्रशेखरैः कलमैः क्षेत्रगतैस्समन्ततः ।
कपिशीक्रियते धराऽधुना ननु हेमन्तऋतुस्समागतः ॥६॥

दिवसास्सुखमावहन्ति नस्तपनेनानतिचण्डभानुना ।
क्रमशश्शिशिरत्वमीयुषी रजनी संप्रति लोकरञ्जनी ॥७॥

अयमेव तरुः पुरा सखे शुशुभे पुष्पफली च पर्णलः ।
अधुना विधिना विमर्दितो बलिना तिष्ठति काष्ठयष्टिवत् ॥८॥

दृढकन्दुकमीरितं बलात् दृढकाष्ठेन विताड्य नन्दिताः ।
शिशवस्तरुणाश्च बालकाः किरिकेट्खेलरतास्समन्ततः ॥९॥

विनिकृत्य नयन्ति कर्षकाः कलमान् धान्यभरान् प्रचेलिमान् ।
नवधान्यंपृथक्कृतीच्छया निजकैदारभुवः खलस्थलीम् ॥१०॥

निजधान्यभरं कृषीवलाश्शकटैरापणमापयन्त्यमी ।
वणिजो धनलाभलोलुपाः दधते तत्क्रयविक्रयक्रियाः ॥११॥

कृतभूरिपरिश्रमाः कृषौ परिवारेण समं कृषीवलाः ।
उपलभ्य फलं गतक्लमाः अधुना केलिकुतूहले रताः ॥१२॥

नटनर्तकनर्तकीव्रजः कलया ग्रामजनान् प्रमोदयन् ।
शिबिरं विरचय्य तिष्ठति स्वकलाकौशलमत्र दर्शयन् ॥१३॥

शिथिलामपनीय तत्त्वचं अतिपीतां परिपाकतो जनः ।
अधुना मधुराणि नागपूर्-भवनासंगफलानि सेवते ॥१४॥

अभिवृद्धिमुपैति शीतता ननु हेमन्तऋतौ विजृम्भति ।
उपयान्ति न सायमुत्सुकाः नगरोद्यानवनानि नागराः ॥१५॥

उदितोऽपि सहस्रदीधितिः उषसा नाद्य चिराय दृश्यते ।
यत एव विभातसंभृता घनकूहा ककुभो निगूहते ॥१६॥

अभिवर्धितशीतकातराः न हि कार्पासवाससेऽधुना ।
मृदुकोमलरोमवाससे स्पृहयन्ते परमूष्मणे जनाः ॥१७॥

सततं हिमखण्डमण्डितशिखरस्सन्नपि शैलराडसौ ।
हिमवानिति सार्थसंज्ञकः परितः पाति हिमेन संप्रति ॥१८॥

बदरीश्वरधाम गच्छतां हिमपातैस्सरणिर्निरुध्यते ।
अथ तत्र पिधाय मन्दिरं अवरोहन्ति गिरेस्तदर्चकाः ॥१९॥

शिशिरागमजाततन्द्रया बहवो निद्रति जन्तवोऽधुना ।
चिरमद्रिगुहां द्रुकोटरं अथवा भूविवरं समाश्रिताः ॥२०॥

गगनमध्यगतोऽपि न गोष्पतिस्तपति नस्तनुमद्य, यथा पुरा ।
तुदति शीकरशीतलमारुतश्शिशिर एष सखे समुपागतः ॥२१॥

शिशिरकालविवर्धितकूहया परिवृता उषसि प्रदिशो दिशः ।
विधृतशैत्यनिवारणकम्बलं विजयते जगदेव यथाऽखिलम् ॥२२॥

शिशिरवेपथुनेव विजृम्भता जहति पाण्डुदलानि महीरुहाः ।
अथ दलानि समूह्य विदाह्य तान्ययमपोहति शैत्यमितो जनः ॥२३॥

शिशिरवारि विसृज्य सरोवरं कमलमाश्रयतीव भुवस्स्थलम् ।
विकसितस्थलपद्मकुलाकुला लसति येन वनोपवनावनी ॥२४॥

शिशिरवारिणि कम्पनकारिणि सपदि मज्जनमुज्झति तज्जनः ।
सुखकरैरधुनोष्मजलैर्गृहे स्नपयति स्वमयं वपुरादरात् ॥२५॥

शिशिरबृंहितशीतमपोहितुं मृदुलरोमविनिर्मितकञ्चुकम् ।
विविधवर्णमतीव मनोहरं परिदधाति जनस्सुखदायकम् ॥२६॥

शिशिरवासरमध्यविनिर्गतो हरितकोमलशाद्वलमास्थितः ।
रुचिररोमविनिर्मिततन्तुभिः वयति कञ्चुकमद्य वधूजनः ॥२७॥

शिशिरितेऽनतिदीर्घदिनेऽधुना विगतचण्डिमचण्डकरे जनाः ।
परिहितोर्णपटा अटनं भुवो विदधते परिवारपरीवृताः ॥२८॥

पक्वैः पथि द्रोः पतितैरतृप्ताः आघ्नन्ति बालाः द्रुममश्मखण्डैः।
पचेलिमान्यप्यवपात्य वृक्षादास्वादयन्तो बदरीफलानि ॥२९॥

गृहेषु केचित्पुनरग्न्यगारं गृहोर्ध्वतो धूममुचं विधाय ।
अङ्गारभूतैरथ दग्धकाष्ठैश्शीतस्य बाधामपसारयन्ति ॥३०॥

शीतेन देहोष्महरेण भीताश्शारीरिकोष्माहरणाय भूयः ।
कुर्वन्ति सर्वे शिशिरेष्वभीक्ष्णं वातामकाजूतिलमिष्टसेवाम् ॥३१॥

घृतार्पणेन व्रणिताधरेषु तैलार्पणेन त्वचि शोषितायाम् ।
कुथार्पणेनाथ गृहे स्थलेषु कालो व्रजत्यावृतकम्बलेन ॥३२॥

काश्मीरराज्ये शिशिरेषु शीतं सोढुं ततस्त्याः अविषह्य भूतम् ।
एलालवंगादिभिरूष्मकृद्भिः कषायमुष्णं कलितं पिवन्ति ॥३३॥

ते कांगडीति व्यपदिश्यमानां अङ्गारपेटीमुदरे वहन्तः ।
घनोर्णवासांसि पुनर्वसानाः व्यपोहयन्त्येधितशीतबाधाम् ॥३४॥

गोधूमसस्यभरितानि मनोहराणि
क्षेत्राणि भान्ति हरितानि कृषीवलानाम् ।
ग्रामेषु शीतविनिवारणदीपिताग्नेः
धूमः प्रसृत्य विपुलं नभ आवृणोति ॥३५॥

ये रोमकम्बलवृताश्शिशिरे निशायां
कान्ताकदुष्णकमनीयकुचोपगूढाः ।
निद्रां महार्हशयने शपिता लभन्ते
तेषां तु भूतलमिदं हि सुवर्गभूतम् ॥३६॥

व्यपैति शीतं दृढकम्बलाय स्पृहा च मन्दीभवति क्रमेण ।
प्रवालवन्तस्तरवो विभान्ति प्राप्तः प्रमोदाय वसन्तकालः ॥३७॥

शनैरुदीचीमभिहिण्डमानः प्रतापमर्कः प्रकटीकरोति ।
भर्तुः प्रतापाधिगमेन तुष्टा छायाऽपि दत्ते सुखमाश्रितानाम् ॥३८॥

नवाम्बुसिक्ता इव भान्ति वृक्षाः नवैर्नवैरङ्कुरितैः प्रवालैः।
उपोषिताः पारणयेव तृप्ताः नदन्ति नन्दन्ति च तैर्विहङ्गाः ॥३९॥

उदेति रागस्तरुपल्लवाग्रे उदेति रागः कलकण्ठकण्ठे ।
उदेति रागो वनिताधरौष्ठे उदेति रागो हृदयेषु यूनाम् ॥४०॥

उद्यानभूमौ तरवो लताश्च विभिन्नवर्णानि विकासयन्ति ।
पुष्पाणि येनाखिलमेव विश्वं विभाति वर्णालिखितैकचित्रम् ॥४१॥

चूतद्रुमेभ्यः कुसुमानि मद्यं क्षरन्ति निष्पादितसौरभाणि ।
पिपासवो यत् परितो भ्रमन्ति पिपीलिका ऊर्ध्वमधश्च रक्ताः ॥४२॥

रसालवृक्षोपवनेषु मत्तः उदञ्चयन् पञ्चममञ्चितेन ।
पुंस्कोकिलः कस्य हरेन्न चित्तं जनस्य गीतेन रतिप्रियस्य ॥४३॥

संतोषकामेन परस्परेण समेयुषा सायमितो जनेन ।
संगीतनाट्येषु कृतक्षणेन सत्याभिधानाः क्षणदाः क्रियन्ते ॥४४॥

प्रदर्शिनीः प्रीतिकरीस्सुमानां आयोजितास्संप्रति तत्र तत्र ।
विलोकयन्तो युवबालवृद्धाः पौराः परां निर्वृतिमाप्नुवन्ति ॥४५॥

करं करे न्यस्य परस्परस्य पुरोपवन्याः पृथुशाद्वलेषु ।
स्थिरानुरागेण चिरोदितेन चरन्ति मन्दं मिथुनानि यूनाम् ॥४६॥

विवाहबन्धे युवतिं युवानं निबध्य मातापितरौ तदीयौ ।
मित्राणि तत्रागतबान्धवाश्च नन्दन्ति वैवाहिकमण्टपेषु ॥४७॥

सायं प्रफुल्लानि निजप्रियायै सुगन्धिमल्लीकुसुमानि कान्तः ।
कार्यालयादत्र निवर्तमानः क्रीणाति वीथीसुमविक्रयिण्याः ॥४८॥

वसन्तकुसुमामोदवासिताक्रीडभूमिषु ।
वसाना वर्णवासांसि विहरन्ति वरांगनाः ॥४९॥

अनल्पपुष्पैरुपकल्प्य तल्पं प्रियः प्रियां स्वामथ शाययित्वा ।
अङ्गानि तस्यास्सुरभीणि भूयः आघ्राति पुष्पैरधिसौरभाणि ॥५०॥

आभूषणं कनदनेकविधं दधानाः
आकर्षि वर्णवसनं विविधं वसाना ।
आमोदिपुष्पनिवहं कच आददानाः
आरामभूषु रमणैः प्रमदा रमन्ते ॥५१॥

ग्रामे द्रुमस्य विटपेष्वनुबन्धितासु
दोलाषु खेलनिरता अधुना तरुण्यः ।
गायन्ति कर्णमधुराणि नवानि पल्ली-
गीतानि पाणितलकल्पिततालवन्ति ॥५२॥

दोलोत्सवं विरचयन्ति समर्च्य कृष्णं
नृत्यन्ति संप्रति जनाः अथ पूर्णिमायाम् ।
होलीदिने विविधवर्णविभिन्नचूर्णै
लिम्पन्ति वर्ष्मणि मिथः परिरभ्य दोर्भ्याम् ॥५३॥

संजाताः स्मरविवशाः स्त्रियः पुमांसः
द्विपदश्च प्रणयभराश्चतुष्पदश्च ।
विश्वस्मिन् विकचसुमैरनेकवर्णै
नन्दन्ति प्रबलमदा वसन्तकाले ॥५४॥

म्लानैरलूनैर्मलिनैः प्रसूनैः विद्योतते नाद्य ततिर्लतानाम् ।
वसन्तकालो भजतेऽवसानं ग्रीष्मश्शनैर्जृम्भति पुष्यदूष्मा ॥५५॥

स्नानाय पानाय च शीतलाय तोयाय लोकस्स्पृहयालुरद्य ।
दिवाकरप्लोषभयेन सद्यो निशाचरत्वं निभृतं वृणोति ॥५६॥

वीथीषु बाला असकृत्तृषार्ताः क्रीत्वाऽऽपणेभ्यो हिमयन्त्रवद्भ्यः ।
आस्वाद्य हृद्ये हिमलेह्यपेये माद्यन्ति सद्यस्सखिभिर्विनद्य ॥५७॥

अतीव तप्ता तपनेन पृथ्वी समुच्छ्वसन्तीव समुत्थधूल्या ।
निवार्य सूर्यं निजतापशान्तिं तनोति तेनाथ जनानुकूलम् ॥५८॥

कार्यालयं कर्मिगणास्तु घर्मे सर्वे न गन्तुं प्रभवन्ति तापात् ।
गच्छन्ति ये तेऽपि न हि क्षमन्ते प्रचण्डतापान्निजकर्म कर्तुम् ॥५९॥

कार्यालयेषूच्चपदस्थितानां वातानुकूलो भवति प्रकोष्ठः ।
घर्मेऽपि येन प्रभवन्ति कर्तुं ते कर्म वातावरणेऽनुकूले ॥६०॥

निदाघतापप्रशमाय मेघाः वर्षेयुराकाशगताः कदेति ।
ईक्षन्त ऊर्ध्वं मुहुरन्तरिक्षं अहो मनुष्याः पशुपक्षिणश्च ॥६१॥

अन्तर्गृहं निद्रितुमक्षमत्वात् संतापहेतोरधुना निदाघे ।
नैके जनास्सद्मवितर्दिकायां संतन्य शय्यां निशि संविशन्ति ॥६२॥

आस्थाय शाखाः कपयो विहंगाः आनन्दतः कूजितमादधानाः ।
आस्वादयन्त्याम्रफलानि वृक्षे आसन्नपाकान्यमृतोपमानि ॥६३॥

क्लान्तो नितान्तं प्रबलातपेन कान्तास्तनौ नाद्य तथा वृणोति ।
कान्तास्तनाभानि जनः फलानि बिल्वस्य तालस्य यथा वृणोति॥६४॥

निरन्तरं स्वेदजलं स्रवन्तीं कण्डूयनेन व्रणितामभीक्ष्णम् ।
चिकित्सति स्वां त्वचमर्पितेन जनोऽधुना शीतलचन्दनेन ॥६५॥

चण्डातपे वर्त्मनि हिण्डमानाः उदन्ययाऽद्य प्रतिहन्यमानाः ।
क्रीत्वा विपण्या नवनारिकेलशलाटुतोयं पथिकाः पिबन्ति ॥६६॥

उष्णेन पान्था उदितामुदन्यां घण्टापथे केनचिदत्र तत्र ।
प्रतिष्ठितां धर्मपरायणेन प्रपां प्रपद्य प्रशमं नयन्ति ॥६७॥

उष्णस्य बाधा समभूतलेषु यदा भवत्यत्यधिका तदैके ।
उपेत्य शीतां गिरि शृङ्गभूमिं निदाघतापं सपदि त्यजन्ति ॥६८॥

नखम्पचोष्णोऽपि निदाघमध्ये यदा कदा वाऽप्युदिताः पयोदाः ।
पिधाय सूर्यं जनतापहृद्भिः हर्षं जनानां जनयन्ति वर्षैः ॥६९॥

तापोपघातजनितेन भयेन लोको
ग्रीष्मे ऋतौ न हि चिकीर्षति दूरयात्राम् ।
भूरिव्ययेन वितनोत्यनिवार्ययात्रां
वातानुकूलितसुशीतलवाहनेन ॥७०॥

प्रशान्तिं प्रयाति प्रवृष्ट्या निदाघः प्ररूढैस्तृणैश्श्यामला भाति पृथ्वी ।
प्रतन्वन्ति नृत्तं प्रमत्ता मयूराः प्रपश्य प्रवृत्ता पुनः प्रावृडद्य ॥७१॥

नभो मेघमालाकुलं वारिवाहैः न भानुर्विभात्यद्य संछाद्यमानः ।
नभस्वानितो वारिशीतः प्रवाति नभः कालमायातमावेदयन्नः ॥७२॥

नवाम्भोभिरार्द्रां हलाधानयोग्यां बलीवर्दजुष्टैर्विकृष्टां प्रकृष्टैः ।
हलैः क्षेत्रिणो धान्यहेतोरिदानीं वितन्वन्ति कैदारिकामुप्तबीजाम् ॥७३॥

समासिच्यमाना समुज्झित्य तापं नवाम्भोधरैरुच्छ्वसन्ती प्रसूते ।
महीस्वेदजानुद्भिदण्डोद्भवांश्च परःकोटिसंख्यानितो जन्तुवर्गान् ॥७४॥

इतो नीलमेघात्ततो नीलमेघात् यथा नीलकण्ठात्स्वमुन्मोचयन्ती ।
भुवं वक्रगत्या विशन्ती क्षणेन भुजङ्गप्रयातं तनोत्यद्य विद्युत् ॥७५॥

प्रवासादियं कालमेघस्य खिन्ना प्रियं प्रावृषि प्राप्य तं जातहर्षा ।
बलाकाततिच्छद्मना पुष्पमालां क्षिपत्यद्य कण्ठे क्षितिस्तस्य नूनम् ॥७६॥

नवैर्नीलमेघैरनेकैरनन्तं शनैश्श्यामभूतं विलोक्याद्य नूनम् ।
फलैश्श्यामलैः पक्वभूतैर्युतानां वनं श्यामतामेति जम्बूद्रुमाणाम् ॥७७॥

प्रियैस्संगतानां प्रवासान्निवृत्तैः मनः पूरयन्ती मुदा मानिनीनाम् ।
प्रियालिङ्गनैर्वर्ष्म रोमाञ्चयन्ती प्रियेण प्रियां प्रावृडेषा युनक्ति ॥७८॥

न दीप्यन्त आर्द्रत्वतोऽद्येन्धनानि सदा धाम्नि धूमावृता पाकशाला ।
क्षमश्शोषणे नार्द्रवस्त्रस्य वातः प्रवृष्ट्या परं क्लेशदा प्रावृडद्य ॥७९॥

समलिङ्ग्य तुंङ्गं गिरीशं विनम्राः यथा लिङ्गमासेचयन्त्यद्भिरब्दाः ।
ततस्त्रोतसां प्रस्तुतानामपापाः अपाकुर्वते पापमापो नराणाम् ॥८०॥

शिवलिङ्गनिभं गिरिशृङ्गमिदं अभिषिञ्चति साब्दघटं गगनम् ।
गलितं सलिलं समुपासीना इव ऋजुबद्धाञ्जलयस्तरवः ॥८१॥

सहस्त्रकिरणं रुद्ध्वा सहस्त्राक्षनियोजिताः ।
वारिधारासहस्त्रेण पूरयन्ति महीं घनाः ॥८२॥

अभ्राणि शुभ्राणि दिवो गतानि समागता व्योमनि नीलमेघाः ।
सितच्छदा अद्य तथा व्यपेताः नृत्यन्ति मत्ता इह नीलकण्ठाः ॥८३॥

विस्तीर्णबर्हेण विभिन्नवर्णदृश्येन वर्षासमये मयूराः ।
देवेन्द्रचापं दिवि रोचमानमावाह्य भूमाविव दर्शयन्ति ॥८४॥

अधिज्य बाणासनमेघनादो विजित्य पूर्वं समरेषु शक्रम् ।
अधिज्यबाणासनमेघनादः स्वयं तमेवाद्य कथं धिनोति ॥८५॥

प्रातः प्रावृषि धारास्नाता पृथ्वी नगाख्यमूर्धानम् ।
किं शोषयते मेघैः धूपैरिव सृत्वरैरेतैः ॥८६॥

ग्रामेषु पल्लीषु पुरेष्विदानीं रिक्तेषु बालाः मृदुशाद्वलेषु ।
क्रीडार्थमेकादशसंख्यपक्षौ क्रीडन्ति कृत्वा पदकन्दुकेन ॥८७॥

पक्वानि वृक्षात् पणसानि लूत्वा करेण वन्याः करिणो वनेषु ।
स्वादून्यदन्तो विगलन्मधूनि तन्वन्त्यभीक्ष्णं मदबृंहितानि ॥८८॥

इन्द्राक्षिवृन्दपतिताः नयनाम्बुधाराः
भानोर्विनिर्गतकराः जलदान् प्रविश्य ।
एताः किमित्यलघुसंशयमादधानाः
संपूरयन्ति सलिलैर्भुवमम्बुधाराः ॥८९॥

नायं सहस्त्रवसुमन्तरयन्तु मा नः
पाथो धरा इति पयोरुहकुड्मलौघः ।
बद्धाञ्जलिश्शिरसि तादृशमूर्तिमत्त्वात्
आलोक्यते जलधरानिव याचमानः ॥९०॥

उपर्युपरि तापिता अपि तपद्भिरर्कांशुभिः
समीरणसमीरितास्तत इतो विधूता अपि ।
दिशन्ति दययाम्बुदास्तृषितचातकेभ्यो जलं
सतां भवति लक्षणं विपदि धर्मसंरक्षणम् ॥९१॥

प्रवृष्य कामं विरताः पयोधराः प्रकाशते निर्मलनीलमम्बरम् ।
प्रसन्नतोयाः प्रवहन्ति निम्नगाः प्रवर्तते पश्य सखे ऋतुश्शरत् ॥९२॥

मुदा दिवां हंसयुवाऽद्य दीव्यति सरोवरे निर्मलनीलवारिणि ।
यथैव राकारजनीकरस्सितश्शरन्निशाव्योमनि नीलनिर्मले ॥९३॥

प्रकामनीलं गगनं प्रकाशते प्रकीर्यमाणं धवलैः पयोधरैः ।
प्ररूढसस्यैर्हरितं तथाऽभितः प्रकीर्यमाणं भुवनं सितच्छदैः ॥९४॥

प्रसन्नतोया प्रपतद्विहंगमा प्रफुल्लपद्मप्रविसारिसौरभा ।
प्रलीनमीना मुखरा शिलीमुखैः प्रकल्पते कस्य मुदे न पद्मिनी ॥९५॥

गृहाद्बहिः प्रावृषिगन्तुमक्षमाश्शरत्प्रतीक्षाः व्यवसायिनः स्थिताः ।
पुनः प्रयाणं व्यवसायहेतवे समारभन्ते शरदागमेऽधुना ॥९६॥

दिने दिने वृद्धिमुपेत्य तिष्ठतो विलोकयन्तः कलमान् पचेलिमान्।
अभूपूर्वा किल ऋद्धिरीदृशीत्यवेत्य विन्दन्ति मुदं कृषीवलाः ॥९७॥

सुपोषितं चातकमादधेऽम्बुदः पिधाय चन्द्रं निशि मामुपोषितम् ।
इतीव खिन्नाय चकोरपक्षिणे मुदं सुधांशुर्वितरन् प्रकाशते ॥९८॥

अनोकहानां दलसंचयः पुरा बभूव पश्श्यामलकोमलामलः ।
स पीतिमानं प्रतिपद्यतेऽधुना वयोऽधिकत्वेन विधेर्निदेशतः ॥९९॥

विरामकालस्समुपागमिष्यति यतोऽद्य पूजासमयस्समागतः ।
अयञ्च विद्यानिलयः पिधास्यते इति प्रहृष्टा इह बालकास्स्थिताः ॥१००॥

न चण्डतां विन्दति चण्डदीधितिः न वृष्टिभिस्संप्रति वर्त्म कर्दमम् ।
न शीतबाधा शिशिरे यथा निशि न जायते कस्य मुदे ऋतुश्शरत् ॥१०१॥

मृदा कृतासु प्रतिमासु सांप्रतं उदारशीला विधिवत्प्रतिष्ठिता ।
सदाऽपि देवी समुपासिता जनैर्मुदा सपर्यां प्रतिगृह्य नन्दति ॥१०२॥

पूजाकृते निर्मितमण्टपेषु भूषान्विता नूतनवर्णवस्त्राः ।
केशे वहन्त्यो नवपुष्पभारं एतास्तरुण्यस्स्वयमेव देव्यः ॥१०३॥

पूजावसाने दशमीदिने ताः विसर्जयन्ति प्रतिमाः नदीषु ।
निशीन्द्रजिद्रावणकुम्भकर्णमूर्तीश्च रामो दहति स्वबाणैः ॥१०४॥

स्त्रोतो नदीनां कृशतामुपैति जातः प्रसन्नस्सरिदम्बुपूरः ।
श्वेतो धुनीनां पुलिनैरनूपः चेतः प्रसन्नं शरदागमेन ॥१०५॥

काश्मीरंजम्मूकुलुलेमणालि - प्रान्तस्थितोद्यानवनागतानि ।
पीतानि रक्तान्यमृतोपमानि जनोऽधुना सेवफलानि भुङ्क्ते ॥१०६॥

शिशिरे तमसस्स्फीतिः रजसो ग्रीष्मे शमोऽस्य वर्षाभिः ।
उन्मिषति शरदि सत्त्वं विमलत्वेनैव सह कखयोः ॥१०७॥

विमलसलिलनीले पुण्डरीकावकीर्णे
विहरति दिनवेलां राजहंसस्तटाके ।
वियति विमलनीले द्योतते पूर्णचन्द्रः
उडुनिकरपरीतश्शारदेऽसौ निशीथे ॥१०८॥

एवं स हेमन्तहिमर्तुराज-
निदाघवर्षाशरदामृतूणाम् ।
षण्णां कविस्सुन्दरराजनामा
काव्ये नवे वर्णनमातनिष्ट ॥१०९॥

❖❖❖

संस्कृतिः

१. अनुष्टुभ् वृत्तम्

क्वाध्वर्यवः क्व होतारः क्वोद्गातारः क्व ऋत्विजः ।
क्व यज्वानः क्व वा वेदाः क्व सा वैदिकसंस्कृतिः ॥

२. रथोद्धता वृत्तम्

आदरातिशय आर्तिपीडितें आनृशंस्यमुपकारशीलता ।
आगतातिथिजनाभिपूजनं आर्जवं सततमार्यसंस्कृतिः ॥

३. वियोगिनी वृत्तम्

भुवि या विरराज संस्कृतिः यवनानामथ रोम्पुरे पुरा ।
व्यतिलंघितधर्मकारणात् इतिहासे *प्रतिलब्धसंस्कृतिः ॥

४. द्रुतविलम्बितं वृत्तम्

जगदशेषमिदं भगवत्कृतं जगदशेषमिदं भगवद्धृतम् ।
जगदशेषमिदं भगवन्मयं इति सनातनवैदिकसंस्कृतिः ॥

५. वंशस्थं वृत्तम्

उदारता दूरगता सहोदरेऽप्यनादरा दारकदर्शयद्दरा ।
दुरोदरे सन्ततदर्शितादरा दुरात्मनां काचिदनार्यसंस्कृतिः ॥

६. मंजुभाषिणी वृत्तम्

अनघा अशेषपरमार्थवेदिनः
स्थितिमादिशन्ति गुरवो यथैव नः ।
अनुरूपमस्य ननु तिष्ठतां नृणां
अतुला विभाति महनीयसंस्कृतिः ॥

७. पञ्चचामरं वृत्तम्

न सन्मतिश्चकास्ति यत्र तत्र नास्ति सद्गुणो
न सद्गुणश्चकास्ति यत्र तत्र नास्ति सज्जनः ।
न सज्जनश्चकास्ति यत्र तत्र नास्ति सद्गुरुः
न सद्गुरुश्चकास्ति यत्र तत्र नास्ति संस्कृतिः ॥

८. हरिणी वृत्तम्

निगमशिरसि न्यञ्चत्पादं स्वतन्त्रमनंकुशं
निरुपधिमहानन्दं नित्यं नियामकमीश्वरम् ।
निगमनिवहाः निर्णेतुं यं न निर्गुणमीशते
निरवधिदयां तस्याश्रित्य स्थिता नरसंस्कृतिः ॥

९. पृथ्वी वृत्तम्

परस्परविताडनं परनिपीडनं पैशुनं
परस्वहृतितत्परं परवधूपरामर्शनम् ।
परोक्षपरनिन्दनं परमसाधुनिर्भत्सनम्
परैः परिविहस्यते परमपावनी संस्कृतिः ॥

१०. शार्दूलविक्रीडतं वृत्तम्

सत्यं यत्र न विद्यते न च दया दुस्स्थे दरिद्रे जने
वृद्धानामुपसेवनं न विदुषां नो यत्र संमाननम् ।
बालानामवहेलना प्रचलति स्त्रैणस्य निर्यातना
पैशाचस्स समाज उच्यत इतः पीडा हि सा संस्कृतिः ॥

भारतं वन्दनीयं भवेत्सर्वदा

–श्रीकान्त मिश्रः, वाराणसी

हेममाणिक्य-वैदूर्यरत्नैर्युतं,
धातृवृक्षादिभिः शोभते प्रत्यहम् ।
निःसृता जाह्नवी पाति पापात्मनो
यत्र तं पर्वतेशं नमामः सदा ॥१॥

राघवो राजते रावणारिः प्रभुः,
कंसकृत् कृष्णचन्द्रश्च जातोऽवनौ ।
शारदा शारदाम्भोजवद् भास्वरा
भाति कामप्रदा पापहा नर्मदा ॥२॥

साम्प्रतं वैपरीत्यं तु जातं सखे !
स्वस्तिपाठो विलुप्तः कलिर्वर्धते ।
दृश्यते धर्महानिर्जगत्यां यदा
जायते भक्तहृद्देशवासी तदा ॥३॥

कालिदासस्य शाकुन्तलं नाटकं,
नैव वाल्मीकिरामायणं पठ्यते ।
प्रत्यहं केवलं गीतिका श्रूयते
विश्वशान्तिर्भविष्यत्यहो नः कदा ॥४॥

लुण्ठनं वञ्चनं चान्यपापादिकं,
देशहानिः, भवेन्नैव कुत्राऽप्यसौ ।
मातृवत्, तातवत्, भ्रातृवत्, स्वात्मवत्,
दृश्यतां भक्तियुक्तो भवेत्सर्वदा ॥५॥

देशसन्नायका ये बभूवुः पुरा,
नेतृवर्गा हुता भारतस्योद्धृतौ ।
शूरवीराः समे मातृभूरक्षकाः
देशभक्ताः प्रभूता सुवन्द्याः सदा ॥
भारतं वन्दनीयं भवेत्सर्वदा ॥

सुपात्रे सतां धीमतां पक्षपातः

–परमानन्द झा

WZ 42H, पोसंगीपुर, जनकपुरी, नई दिल्ली-५८

हसत्कैरवौघे हिमांशोः कराणां, चलच्चञ्चरीकोच्चये पुष्कराणाम् ।
विषण्णे कृषाणे च धाराधराणां, सुपात्रे सतां धीमतां पक्षपातः ॥१॥

नयज्ञो नयेद् गर्हणामर्हणाँव्वा, श्रियः सञ्चयः स्यात् क्षणँव्वा विघातः।
अहो! दुःखसौख्योभयाद् दूरगाणां सुपात्रे सतां धीमतां पक्षपातः ॥२॥

प्रभुः स्यात् प्रसन्नः पुनर्वाऽवसन्नः सुखं सिद्ध्यतु स्वस्य वा दुःखपातः।
अहो ! कीदृगासीत् पुराऽरौ सुते वा सुपात्रे सतां धीमतां पक्षपातः ॥३॥

परन्त्वद्य पात्रं भवेद् दक्षिणाढ्यं यदीयं, सुपात्रो[1]ऽधुनाऽसौ धुरिस्थः।
अतोऽद्य श्वपाकेऽथवा शुन्यभिन्नः सुपात्रे सतां धीमतां पक्षपातः ॥४॥

लुठत्यद्य विद्यावतां स्वाभिमानः क्षणे क्षीणतामाप्तता हन्त! याति ।
श्रियं पश्यतां, दृश्यतां क्व प्रयातः सुपात्रे सतां धीमतां प्रक्षपातः ॥५॥

क्वचिद् व्यक्तिवादः क्वचिज्जातिवादः क्वचित्प्रान्तराष्ट्रान्तरीयादिवादः ।
क्व यातोऽधुना धीरहंसावदातः सुपात्रे सतां धीमतां पक्षपातः ॥६॥

वृथैवायमाप्तोपदेशः प्रमाणं, वृथा क्षीरनीरप्रवादस्य गानम् ।
इयं सूक्तिरप्यङ्गजीर्णैव जाता–'सुपात्रे सतां धीमतां पक्षपातः' ॥७॥

धुनीते धियः शारदा सर्वशुक्ला समाराधिता चेद् बुधैर्ध्वान्तमन्तः ।
कुतो विक्रियन्ते बुधाः ? केन नाद्य सुपात्रे सतां धीमतां पक्षपातः? ॥८॥

कुतोऽर्थैरुपेक्षाऽद्य सत्पात्रतायाः? किमद्यापि वाणीन्दिरे वा विवादः?
परामृश्यतामत्र बीजं, न कस्मात् सुपात्रे सतां धीमतां पक्षपातः ॥९॥

श्रुतं काममद्यापि विद्याधनेषु क्रिया किन्तु तत्कीर्त्तिता कार्श्यमेति ।
स्थितं साम्प्रतं बीजमेतन्न यस्मात् सुपात्रे सतां धीमतां पक्षपातः ॥१०॥

अतोऽभ्यर्थना भूरिशस्तेषु भुत्सु क्रियाहीन-विज्ञानभारं भरत्सु ।
अये सूरयः ! स्मर्यतां स्वोऽभिजातः सुपात्रे सतां धीमतां पक्षपातः ॥११॥

---

1. सुष्ठु पात्रं यस्य असौ सुपात्रः इति वर्तमानकाले व्युत्पत्तिः ।

दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट नं० ५, झण्डेवालान, करोल बाग, नई दिल्ली-११०००५

त्रिदिवसीय संस्कृत सम्मेलन
वर्ष २००१-२००२

दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा अप्रैल २००२ में त्रिदिवसीय संस्कृत सम्मेलन का आयोजन करने जा रही है। जिसमें निम्नलिखित बिन्दुओं के विभिन्न पक्षों पर लेख वाचन एवं चर्चा होगी :–

१. संस्कृत वाङ्मय में जीवन दर्शन
२. संस्कृत वाङ्मय में अन्तरिक्ष विज्ञान
३. संस्कृत वाङ्मय में भूगर्भ विज्ञान
४. संस्कृत वाङ्मय में प्राणी विज्ञान

उक्त प्रस्तावित विषयों में से किसी एक पर कम से कम सारगर्भित १० पृष्ठों के लेख विद्वान् वक्ता वाचन कर सकता है। लेख की भाषा संस्कृत होनी आवश्यक है। विशेष परिस्थिति में हिन्दी में भी लेख स्वीकार किये जा सकते हैं।

उक्त सम्मेलन में लेखों का चयन करने के पश्चात् ही प्रतिभागी विद्वान् को आमन्त्रित किया जायेगा। कृपया अपनी स्वीकृति २८-२-२००२ तक भेजने की कृपा करें साथ ही ३१-३-२००२ तक लेख प्रेषित करने का कष्ट करें।

श्रीकृष्ण सेमवाल
सचिव
दिली संस्कृत अकादमी
दिल्ली सरकार, दिल्ली

किं कुर्यात्

–डॉ० रमाकान्त शुक्लः
आर ६ वाणीविहारः, नयी दिल्ली-११००५९

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात् !
विरुद्धे भागधेये कर्म कुर्वाणोऽपि किं कुर्यात् ?
'विलिण्टाइन' दिने छात्राः कुसुमहस्ता गताः पार्के ।
वराकोऽध्यापको गत्वापि कक्षे ब्रूहि किं कुर्यात् ॥
गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम् ।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात् ॥
गृहाच्चलितः समयैतोऽहं परं मध्येपथं रुद्धः ।
'विलम्बादागतोऽस्मी'ति क्षमायाच्ञापि किं कुर्यात् ॥
उपस्थितिपञ्जिकास्ते द्वारि चारक्षी लगुडहस्तः ।
तथापि त्वं त्वदीयैस्ताड्यसे चेत्कोऽत्र किं कुर्यात् ॥
भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः ।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात् ॥
श्रुतो धर्मः, कृता सन्ध्या, श्रिते चाभ्यासवैराग्ये ।
जहाति च नैव चाञ्चल्यं मनः किल कोऽत्र किं कुर्यात् ॥
अहं यां चिन्तयाम्यनिशं विना यां नो लभे निद्राम् ।
न सा दूरध्वनौ सुलभा, जनोऽयं मित्र ! किं कुर्यात् ॥
प्रिया भार्या त्वमसि, वदसि प्रियं प्रियमण्ड़ने, पत्यै ।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात् ?
त्वया विषभक्षणं कृत्वा कृतायामात्महत्यायाम् ।
प्रियस्त्वां नैति चेद् द्रष्टुं तवेदं कर्म किं कुर्यात् ॥
वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे ।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात् ?
महामात्योऽटलोऽध्यक्षो मुशर्रफ् चागरानगरे ।
शिखरवार्तावसाने निष्फलौ ! कः कोऽत्र किं कुर्यात् ?

'मृतो वा जीवितो वापेक्ष्यते न्यायाय लादेनः ।'
प्रतिज्ञायापि नो लभते बुशस्तं चेत्स किं कुर्यात् !
कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम् ।
इदानीं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात् !
इमे प्रतिपक्षिणो भूत्वा समायाता वृकाः सदने ।
परं तत्रैकतां प्राप्ता ऋजुर्मेषोऽत्र किं कुर्यात् !
इमे बहुनायका रथिनो रथं विमता यदारूढाः ।
निनीषुस्तं प्रमुखसारथिरयं विवशो नु किं कुर्यात् ?
मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः ।
ददासि न चेत्त्वमुत्कोचं तदा नेतापि किं कुर्यात् ?
अरण्ये रोदनं कुरुषे बधिरकर्णे जपसि बन्धो !
पठितवानसि बहून् ग्रन्थान्, त्वदर्थं कोऽपि किं कुर्यात्!
गृहीत्वा पाटलं पुष्पं वसन्तो द्वारि सम्प्राप्तः ।
मनसि किल पत्रशातनमस्ति, मधुमासोऽत्र किं कुर्यात्!
कवी रात्रौ लिखति कविताममरकोशं मुहुः पश्यन् ।
न च श्रोतास्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात् !
कृते यत्नेऽपि मुद्रणदोषतो मुक्तिर्न यदि लभ्या ।
तदाक्षरयोजकः सम्पादको वा मित्र! किं कुर्यात्!
अहं शस्त्रास्त्रसम्पन्नो भटः सीमासु तिष्ठामि ।
न चादेशं लभे युद्धस्य, शौर्यं मेऽत्र किं कुर्यात् ?
मदीयौ द्वौ सखायौ हस्तमेलनमद्य नो कुरुतः ।
तयोर्मैत्रीं दिदृक्षुश्चेज्जनोऽयं ब्रूहि किं कुर्यात् ?
ययोरशनं कुलं शीलं तथा कर्माणि भिद्यन्ते ।
तयोर्मैत्रीं विवाहं चेच्छसि त्वं ? कोऽत्र किं कुर्यात् ॥
स्वराष्ट्रस्य प्रगतिमिच्छन्ति कवयोऽध्यापका वीराः ।
भटा उद्योगिनः श्रमिणः, कुनेता किन्तु किं कुर्यात् !
यदास्माभिश्चिताः प्रभवो मलीमसकर्म कुर्वाणाः ।
मुहुर्गायन् 'स्वभारतभा' रमाकान्तोऽपि किं कुर्यात् ॥

१६.२.२००२

डॉ० वर्णेकरमहोदयानां शिवराजनिष्ठसाहित्ये राष्ट्रीयविचाराः ।

प्रा. सौ. ऊर्मिला अराणके
सातारा, (छत्रपतिः शिवाजी महाविद्यालयः)

प्रस्तावना- भारतदेशे ये ये देशसेवकाः सज्जनाः नेतारः महात्मानः च अभवन् तेषां सर्वेषां विपुलानि चरित्राणि सर्वासु प्रान्तीयभाषासु उपलब्धानि। सर्वे प्रान्तीयजनाः तेषां मातृभाषासु रचितानि महात्मनां चरित्राणि महत्या आस्थया आदरेण भक्तिभावेन च पठन्ति। महाराष्ट्रभाषायां रामकृष्णतः राजीवगान्धि पर्यन्तम् सर्वराष्ट्रनायकानां तथा च ज्ञानेश्वरादिमहात्मनां महन्ति चरित्राणि उपलब्धानि सन्ति । ईदृश्यां अवस्थायां अत्यल्पैः ज्ञाते संस्कृते चरित्रलेखनस्य कः हेतु ?

अंह मन्ये रामकृष्णयोः कथाः ताः एव भवन्ति तथापि भिन्नलेखकानां रचनावैशिष्टय भिन्नं भिन्नमस्ति। तासु कथासु नवनवोन्मेषाः तथा च विभिन्नाः लेखनहेतवः अपि सन्ति। सस्कृतभाषा समर्था तथा च सर्वप्रान्तयुतिकरा अस्ति। कस्मात् कारणात्? सर्वाः भारतीयभाषाः संस्कृतोद्भवाः अतः एव संस्कृतभाषा सर्वप्रान्तयुतिकरा तथा च अनन्यसाधारणमहत्त्वपूर्णा अस्ति। न केवलं भारतदेशेऽपि तु इंग्लैंड-अमेरिका-जर्मनी-फ्रान्स-जापान-रशियादिषु विभिन्नदेशेषु संस्कृतविद्वांसः संस्कृतरुचियुक्ताः संस्कृताध्ययनपरायणाः च सन्ति। प्राचीनकाले संस्कृतभाषायां एव अस्माकं सांस्कृतिकः इतिहासः प्रतिबिंबितः अस्ति। संस्कृतभाषाविषयकं अभिमानं अभिरुचिं प्रेम च निर्मातुं प्राचीनकाले संस्कृतभाषा लोकभाषा राजभाषा इति सर्वैः अनुमता आसीत्। तस्याः अभिवृद्धये अद्यापि केचन प्रयत्नशीलाः सन्ति। राष्ट्रनिष्ठानां महात्मनां देशभक्तानां गुणप्रदर्शनार्थं तथैव समाजप्रबोधनं कर्तुं संस्कृतभाषायां साहित्यनिर्मितिः भवति ।

हिंदवीस्वराज्यस्थापनकर्ता छत्रपतिः शिवरायः महाराष्ट्रस्य आराध्यदैवतं अस्ति। राष्ट्रनिष्ठायाः स्फूर्तिस्थानं स्वातंत्र्यप्रेरकं राष्ट्रनायकं शिवाजिमहाराजं काव्यनाटकानां चरित्रनायकं कृत्वा अनेके संस्कृतकवयः बहूनि महाकाव्यानि नाटकानि च लिखितवन्तः।

डॉ० श्रीधर भास्कर वर्णेकरः- महाराष्ट्रे स्वातन्त्र्योत्तरकाले बहवः संस्कृतकवयः शिवराजचरित्रविषयकानि काव्यानि लिखित्वा शिवराजनिष्ठाः राष्ट्रनिष्ठाः च प्रतिपादितवन्तः । तेषु एव कविषु महाकविशिरोमणेः डॉ० वर्णेकरमहोदयस्य शिवराजनिष्ठा न केवला स्तुत्या अनुकरणीया अपि ।

रचनाः- अर्वाचीनसंस्कृतसाहित्यस्य इतिहासः, भारतीयधर्मतत्त्वज्ञानम्, संस्कृतवाङ्मयकोशः, मन्दोर्मिमाला, महाभारतम्, संस्कृतनाट्यप्रवेशः जवाहर-तरङ्गिणी, विनायकवैजयन्ती, कालिदासरहस्यम्, रामकृष्णपरमहंसीयम्, वात्सल्यरसायनम्, शिवराज्योदयम् (साहित्य आकादमी पुरस्कारप्राप्तम्), विवेकानन्दविजयम्, शिवराजाभिषेकम्, अध्यात्मशिवायनम्, श्रीरामसंगीतिका (कालिदासपुरस्कारप्राप्ता), श्रीकृष्णसंगीतिका, श्रमगीता, ग्रामगीतामृतम्, संघगीता, तीर्थभारतम्, अभंगधर्मपदम् सुबोधज्ञानेश्वरी इत्यादयः ग्रन्थाः तस्य काव्यसरण्या सुशोभिताः ।

डॉ० वर्णेकरमहोदयस्य मनसि शिवरायस्य कृते नितान्तादरोऽपारश्रद्धा च वर्तेते। शिवरायस्य चरित्रं गातुं सः श्रीशिवराज्योदयं महाकाव्यं शिवराजाभिषेकं नाटकं अध्यात्मशिवायनं पोथीकाव्यं रचितवान्। शिवरायस्य राष्ट्रप्रेम्णा स्वराज्यनिर्माणस्य राष्ट्रोत्कर्षस्य च ध्येयेन श्री. वर्णेकरमहोदयः प्रभावितः। तस्य एतेषु सर्वेष्वपि काव्येषु शिवराजनिष्ठा प्रकटिता भवति। शिवराजनिष्ठे साहित्ये वर्णेकरमहोदयस्य राष्ट्रनिष्ठापि व्यक्ता भवति। एतेषु काव्येषु वर्तमानानां राष्ट्रसूक्तीनां विवेचनप्रयत्नः अस्मिन् शोधनिबंधे मया कृतः ।

श्रीशिवराज्योदयम्-

छत्रपतेः शिवरायस्य जन्मनः राज्याभिषेकपर्यन्तम् चरितं ६८ सर्गेषु ३८६७ श्लोकैः गीतं एतत् महाकाव्यं वर्तते।

क्व मुष्टिपूर्णाः मावलाः क्व मुघलमहासाम्राज्यम्। तथापि तेन मुघलराजेन सह संघर्षकर्ता शिवाजिमहाराजः स्वराज्यस्वप्नं प्रत्यक्षीकृतवान्। शिवराजवचनस्य तथा स्वराज्यस्य कृते स्वप्राणान् त्यक्तुं तत्पराः मावलजनाः न केवलं महाराष्ट्रजनानां मनसि अपितु अखिलभारतीयजनानां मनसि राष्ट्रचैतन्यनिर्मितिं कुर्वन्ति। मावलजनानां केवलं स्मरणमपि स्फूर्तिगानं भवति। 'पोवाडा' इति मावलजनानां शौर्यगानं स्फूर्तिगानं श्रुत्वा पठित्वा गीत्वा वा अस्माकं तनुषु मनस्सु यदि चैतन्यं न संचरेत् तर्हि आश्चर्यं भवति। शिवरायसहायकाः

मावलजनाः सर्वैः चिरस्मरणीयाः सन्ति। शिवरायस्य सम्पूर्णं जीवनं स्फूर्तिदायकं अतः तस्य जीवनचित्रीकुर्वाणे अस्मिन् महाकाव्ये बहवः राष्ट्रीयविचाराः दृश्यन्ते। यथा–

यदा राष्ट्रं परतन्त्रमस्ति तदा किं भवतीति एतस्मिन् श्लोके कथितम्–

''धर्मसंस्कृतिविनाशकारिणी चित्तवित्तबलबुद्धिशोषिणी ।
म्लेच्छराजघटिका हि दासता ऐहिकी प्रकटनिर्ऋतिर्नृणाम् ॥''[१]

राष्ट्रे परशासनं भवति चेत् तर्हि धर्मसंस्कृत्योः विनाशः अवश्यं भवति। जनानां मनोबुद्धिवित्तबलानि क्षीणानि भवन्ति। परराजस्य कृपया प्राप्तविभवात् स्वपरांक्रमेण रक्षिता वनवासिनः स्वतन्त्रता श्लाघ्यतरा भवति इति विचारः एतस्मिन् श्लोके दृश्यते :

''म्लेच्छभूमिभृदनुग्रहार्जितवैभवादपि वरीयसी मम ।
आत्मबाहुबलमात्ररक्षिता मानिनो वनसदः स्वतन्त्रता ॥''[२]

जातिधर्मद्रोहियवनशासनाग्रे स्वपुत्रस्य नतमस्तकत्वं राष्ट्रधर्मयोः अभिमानघातकमिति जिजामातुः मतम्। तस्याः आत्मविश्वासपूर्णे कथने ऊर्जस्विता दृश्यते–

''न पारतंत्र्यप्रहते हि देशे वसन्ति देवा ध्रियते च धर्मः ।''[३]

पराधीने देशे न देवता-प्रतिष्ठा न च धर्मसम्मानः।

राष्ट्रसेवाव्रतीकृताः जनाः कथं भवेयुः अस्मिन् विषये वर्णेकरकृतवर्णनं चिन्तनीयम् तथा अनुसरणीयं च :

न सम्मानकामो न वा वित्तलोभो न च स्वार्थमोहो न शक्त्युन्मदो वा।
मनस्यस्तु वो राष्ट्रसेवाव्रतानां सखायः कदाचित् कुतश्चित् कथञ्चित्॥[४]

राष्ट्रसेवाव्रतीनां मनःसु सम्मानकामना धनलोभः स्वार्थसिद्धिमोहः शक्तिमदः वा कदापि न भवेयुः।

अयं नरः धर्मेण मुस्लीमः अतः एष रिपुः इति विचारः न शिवरायसंमतः। ये ये धर्मान्धाः राष्ट्रद्रोहिणः च जनाः ते ते राष्ट्रस्य रिपवः एव सन्ति। भवन्तु नाम ते केषांचित् धर्माणाम्। भवन्तु ते यवनाः वा स्वजनाः वा। ते शत्रवः एव। तेषां पारिपत्यं आवश्यकं एव। न ते दुर्लक्षणीयाः। परन्तु ये ये स्वमतानुसारिणः भवन्ति तान् सर्वान् स्वकीयान् मत्वा शिवरायेन स्वराज्यनिर्माणकार्ये तथा

स्वराज्यरक्षणकार्ये तेषां साहाय्यं अधिगतम्। कामं ते यवनाः अपि भवन्तु। **"ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः यवनास्तथा भवन्तु शस्त्रसन्नद्धाः स्वराज्यरणहेतवे।"**

धर्मरक्षणार्थमेव शस्त्रधारणं कृतम्। तस्मात् धर्मपालनं सर्वश्रेष्ठं कर्तव्यम्। अस्मिन् कार्ये ये केऽपि धर्मविरोधिनः कामं ते स्वजनाः स्वदेशबांधवाः अपि यदि स्युः, तेऽपि रिपवः नूनम् :

सद्धर्मरक्षणकृतेऽस्मि गृहीतखड्गः तत्पालनं परतरः खलु मे स्वधर्मः।
ये किन्तु धर्मरिपवः स्वजनाः अपि स्युः नूनं मता मम महारिपवस्त एव॥[५]

पञ्चमे सर्गे जिजाबाईमहोदयया शिवरायं या राजनीतिः उपदिष्टा सा अतीवभावोत्तेजका प्रेरका च। सा शिवरायस्य पुरतः रामकृष्णभीष्महनुमताम् आदर्शान् स्थापितवती सर्वधर्मसमभावं पाठितवती तथा च स्वराष्ट्रसंस्कृतिरक्षणार्थं प्राणार्पणमपि कर्तुमुपदिष्टवती :

कुलस्य वर्णस्य च राष्ट्रकस्य धर्मो हि कः का च परंपरा मे ।
अहर्निशं चिन्तय सम्यगेवं चिन्तामणिश्चिन्तनमेतदेव ॥[६]

म्लेच्छैश्चिराया क्रमिताऽतिपापैः या मातृभूमिस्तव पुण्यभूमिः ।
प्राणव्ययेनापि विमोचयैनां कर्तव्यमेतत् तव जन्मसिद्धम् ॥[७]

वृद्धः दादोजिः 'मातृभूमेः उद्धारः एव धर्मः' इति उपदिशति। तदा अस्मिता ओजस्विता च स्फुरतः। **'आत्ममुक्तिं तिरस्कृत्य राष्ट्रमुक्तिः वरीयसी'** इति मत्वा तदेव महत्कार्यं मन्यमानः शिवरायः राष्ट्रमुक्तिकार्ये रतः।

शिवाजिमहाराजेन जयसिंहाय प्रेषितपत्रे तस्य राष्ट्रार्पितं भावयुक्तं च मनः प्रकटितम्।

"नष्टस्वराज्यस्य जनस्य नूनं स्वदेशभक्तिः खलु देवभक्तिः ।
धर्मस्य सम्यक् परिपालनं च स्वातंत्र्यसंपादनयत्न एव ॥"[८]

पराधीनदेशवासिनां कृते देशस्य स्वाधीनतायै कृतः प्रयत्नः एव धर्माचरणम् स्वदेशभक्तिरेव ईश्वरपूजा स्वतंत्रता कुलदेवता च। स्वराज्यस्य प्राप्त्यर्थं रक्षणार्थं च शूरा सेना कुशलः सेनापतिः च आवश्यकौ। पराक्रमयुक्ता सेना राष्ट्रचैतन्यं खलु। एवं बहुभिः सूक्तिभिः परिपूर्णं एतद् महाकाव्यम्। शिवसैनिकमुखेन कविः भारतराष्ट्रस्य जयजयकारं करोति।

"जयोऽस्तु नित्यं शिवशासनस्य हिंदुस्वराज्यस्य चिरं जयोऽस्तु ।
जयोऽस्तु धर्मस्य सनातनस्य जयोऽस्तु राष्ट्रस्य च भारतस्य ॥'"

शिवराज्याभिषेकम् नाटकम्

शिवराज्याभिषेकम् नाम सप्ताङ्कं नाटकं श्री वर्णेकरमहोदय: १९७४ तमे ख्रिस्ताब्दे शिवछत्रपते: राज्यारोहणत्रिशताब्दिमहोत्सवनिमित्तेन लिखितवान्।

अस्मिन्नाटके राष्ट्रभक्त-स्वातंत्र्यपूजक-छत्रपति-शिवाजिमहाराजस्य राज्याभिषेकमहोत्सवस्य साङ्गोपाङ्गं चित्रणं कृतम्। नाटकस्य प्रारम्भे गुरुकुलछात्रप्रदर्शिते 'पूर्वशिवचरितम्' नाम्नि छायानाटके राष्ट्रनेतु: शिंवाजिमहाराजस्य तस्यानुगामिनां मित्राणां च स्वराष्ट्राभिमांनयुक्तानि कार्याणि प्रेक्षकान् ज्ञापयितुं राष्ट्रीयचैतन्यं उद्दीप्तं भवति।

चरितं रघुनाथस्य विजयश्रीविराजितम् ।
वीराद्भुतरसं पुण्यं रामायणमिवापरम् ॥[१०]

शिवराजचरितं विजयश्रीपरिपूर्णं वीराद्भुतरसयुक्तं तथा च रामायणमिव पवित्रमस्ति। शिवराजस्य चरित्रं रामायणेन सह तोलयित्वा नाटककारेण शिवरायाय रामयोग्यता प्रदत्ता। छायानाटके प्रथमे दृश्ये 'शिवबा' तस्य सखिभि: सह शङ्करमन्दिरे स्वराज्यप्राप्त्यर्थं यां सामुदायिकां प्रार्थनां करोति तदा वाचकानां श्रोतृणां मन:सु राष्ट्रीयभावना जागर्ति स्फूर्ति: च संचरति। तस्या: प्रार्थनाया भावार्थ: एवं भवति-

"भारतराष्ट्रस्वातंत्र्यप्राप्त्यर्थं वयं कृतसङ्कल्पा: अत: राष्ट्रशत्रु-दमनं क(अस्माकं अश्वेषु झंझानिलवेग: संचरतु, अस्माकं खड्गा: प्रलयाग्निरिव भवन्तु. अस्माकं मुष्टिप्रहारेषु भीमगदाया: सामर्थ्यं आगच्छतु, अस्माकं कुन्ता: त्रिशूलवत् अमोघा: सन्तु, अस्माकं भारतभूमौ कोऽपि विरोधक: मास्तु ।"

शिवराजस्य राज्याभिषेकप्रसङ्गे भारतस्य सर्वेभ्य: प्रान्तेभ्य: सहर्षागतानां नरनारीणां वर्णनम् राष्ट्रैक्यभावनावर्धनाय उपयुक्तम्। स्वातंत्र्यप्राप्त्यर्थं प्राणाहुतिप्रदत्तान् वीरान् स्मृत्वा तेभ्य: मानवंदनां दातुं जिजाऊराजमात्रा गीतं कवन लेखकस्य स्वातन्त्र्यवीराणां कृते प्रगाढं आदरमेव प्रकाशयति ।

सप्तमे अङ्के स्वतंत्रभारतस्य कृतं रम्यवर्णनं वाचकानां मन:सु स्वतंत्रभारतविषये प्रेमादरं भक्तिं च निर्मातुं समर्थमस्ति ।

"शस्त्रे शास्त्रे धने धान्ये भाषाभूषा-कलादिषु ।
अपरायत्तमूर्जस्वि स्वराज्यं कामयामहे ॥"[११]

शस्त्रशास्त्रधनधान्यवेषभूषादिषु सर्वार्थेन यत् स्वाधीनं तत् स्वराज्यं वयं इच्छामः ।

"भूयाद् भारतवर्षमेतदखिलं ह्यासेतुहैमाचलं
ध्वस्तारातिबलप्रभावमुदितस्वत्वाभिमानोन्नतम् ।
त्यक्त्वान्योन्यविरोधमत्र जनताः सद्धर्मवर्त्मानुगाः
वर्धन्तां शिवराजपुण्यचरितान्यन्तः स्मरत्योऽनिशम् ॥"[१२]

आसमुद्रात् हिमालयपर्यन्तं अखण्डः भारतदेशः शत्रुहीनः तथा च गौरवसम्पन्नः भवतु। अत्रस्था सन्मार्गगामिनी जनता परस्परविरोधं विहाय शिवरायस्य पुण्यचरितं स्मरन्ती सततं समृद्धिं भजतु ।

अध्यात्मशिवायनम्

कीर्तनप्रवचनैः लोकेषु यथा भगवद्भक्त्युत्पादनं शक्यं तथैव देशभक्तिनिर्माणमपि शक्यमस्ति। एतं विचारमनुसृत्य 'पोथी' स्वरूपसाहित्यमपि आधुनिके काले कैश्चित् निर्मितम्। तस्य साहित्यस्य वाचनश्रवणाभ्यां जनतायां राष्ट्रचैतन्यनिर्माणं भवति। राष्ट्रीया भावना वृद्धिंगता भवति। तस्मात् डॉ० वर्णेकरमहोदस्य 'अध्यात्मशिवायनं' प्रशंसनीयम् ।

'अध्यात्मशिवायने' काव्ये सप्ताध्यायाः ३०६ पद्यानि च वर्तन्ते। पौराणिक्यां शैल्यां लिखितमेतत् काव्यम्। स्वामिविवेकानन्द-लोकमान्यतिलकयोः संवादरूपं काव्यमेदत् वर्तते। अस्मिन् काव्ये भारतराष्ट्रोद्धारकस्य वीरशिरोमणेः छत्रपतिशिवाजिमहाराजस्य लोकोत्तरोर्जस्वलकार्यस्य संक्षिप्तं परन्तु मर्मस्पर्शि इतिवृत्तम् वर्तते। तेन शिवरायकार्यवृत्तेन भारतीयानां अर्धमूर्च्छितायै राष्ट्रभावनायै चैतन्यं प्रदत्तं भवति। अहो कृतकृत्यता लेखकस्य डॉ० वर्णेकरमहोदयस्य।

अत्र प्रश्नकर्ता स्वामी विवेकानन्दः उत्तरदात्ता च तिलकः । भारतस्य दुर्दशां दृष्ट्वा स्वामी विवेकानन्दः दुःखग्रस्तः भवति। स लोकमान्यतिलकं तं उपायं पृच्छति येन भारतदेशः विश्वेऽस्मिन् पुनः सम्मानपूर्णः भविष्यति। तदा प्रदत्तं तिलकस्योत्तरं मननीयम्–"वयं भारतवासिनः आत्मगौरवं विस्मृतवन्तः। अस्माकं राष्ट्रनायकानां आदर्शान् त्यक्तवन्तः चातः एव अस्माकं राष्ट्रमवमानितं

विदेशीयदास्यशृङ्खलायां बद्धं च। अस्यां अवस्थायां आत्महीनताभावनां दूरीकर्तुं गृहे गृहे सर्वेषु जनेषु अस्माकं पूर्वजानां राष्ट्रनायकानां चरित्राणां प्रसारः आवश्यकः। राष्ट्रनिष्ठा प्रतिष्ठां प्रापयतु। राष्ट्रहितार्थं सर्वैः पूर्वज-कृत-बलिदानानुकरणं करणीयम्। तदेव अस्माकं देशे राष्ट्रचैतन्यं निर्मास्यति। राष्ट्राभिमानभावना सर्वेषां हृदयेषु वासं करिष्यति च।''[१३]

लोकमान्यतिलकमाध्यमेन डॉ० वर्णेकरमहोदयः महता प्रभावेण स्वमतानि प्रतिपादितवान्। विवेकानन्दस्य शिवचरित्रशुश्रूषां ज्ञात्वा लोकमान्यतिलकमुखेन प्रभावशालिन्यां शैल्यां कविना शिवरायस्य कार्यवर्णनं कृतम्। स्वराज्यविरोधिनां न केवलं यवनानां परन्तु हिन्दूनामपि शिवरायेण निःपातः कृतः।[१४] राष्ट्रहितार्थं 'शठेषु शाठ्यम्' इति नीतिः तेन उचिता मता। शिवरायेण राष्ट्रभावनया धर्मान्तरिताः यवनाः पुनश्च हिन्दुधर्मे समाविष्टाः कृताः।[१५] विवेकानन्दमाध्यमेन कवेः सत्कामना प्रकटिता ।[१७]

निष्कर्षः

महाकवेः डॉ० वर्णेकरमहोदयस्य श्रीशिवराज्योदयम् शिवराज्याभिषेकम् तथा अध्यात्मशिवायनम् एतेषु त्रिषु काव्येषु तस्य छत्रपतिशिवाजिमहाराजनिष्ठा दृष्टा भवंति, शिवरायं प्रति सादराभिमानः व्यक्तः भवति तथा मातृभूमिविषयका नितान्ता भक्तिः अपि प्रकटिता। एतानि काव्यानि स्वदेशाभिमानपरिपूर्णानि सन्ति। एतेषु काव्येषु राष्ट्रस्वातन्त्र्यस्य राष्ट्रैक्यस्य राष्ट्रोत्कर्षस्य च आस्था प्रकटिता। एतेषां काव्यानां वाचनेन वाचकानां अन्तःकरणेषु अवश्यमेव राष्ट्रनिष्ठा समुत्पत्यते वर्धिष्यते च। सर्वेषु जनेषु राष्ट्रचैतन्यं स्फुरिष्यति। साम्प्रतं युवकेषु राष्ट्रीयभावनां निर्मातुं वर्धयितुं च एतानि काव्यानि अत्यन्तोपयुक्तानि सन्ति। ओजोगुणप्रधानानि एतानि त्रीणि काव्यानि। अत्र वीररसः प्रधानरसः 'शृंगारो रसराजः' इति संस्कृतसाहित्ये दुर्ललितस्य शृङ्गारस्य स्थानं राष्ट्रभक्तियुक्तवीररसाय दत्त्वा महाकविना डॉ० वर्णेकरमहोदयेन कालोचितावश्यकता पूर्णतां नीता।

सन्दर्भसूचिः—

१ श्रीशिवराज्योदयम् १.५५

२ श्रीशिवराज्योदयम् ६.३७

३ श्रीशिवराज्योदयम् ४२.४८

४ श्रीशिवराज्योदयम् २७.५८

५ श्रीशिवराज्योदयम् ३८.६६

६ श्रीशिवराज्योदयम् ५.४१

७ श्रीशिवराज्योदयम् ५.५४

८ श्रीशिवराज्योदयम् ४८.५०

९ श्रीशिवराज्योदयम् २८.४७

१० शिवराज्याभिषेकम् प्रस्तावना ९३

११ शिवराज्याभिषेकम् ७.७

१२ शिवराज्याभिषेकम् ७.१०

१३ अध्यात्मशिवायनम् १.१०–१९

१४ अध्यात्मशिवायनम् ३.२४–४.१९

१५ अध्यात्मशिवायनम् ५.१६

१६ अध्यात्मशिवायनम् ६.२४–६७

१७ अध्यात्मशिवायनम् ७.५२–६१

सन्दर्भग्रन्थः

प्रज्ञाभारतीयम् (डॉ० श्री०भा० वर्णेकरमहाशयानां समग्रसंस्कृतसाहित्य-संग्रहः)

लेखक : प्रज्ञाभारती डॉ० श्री०भा० वर्णेकरः, नागपुरम्

प्रथमावृत्ति : ऑक्टोबरः १९९३

किं कुर्युः संस्कृतज्ञाः

–जग औतार शर्मा
प्राचार्यः,
श्रीटीबरीनाथ साङ्गवेद संस्कृत महाविद्यालयः, नैनीताल मार्गः, बरेली

संस्कृतभाषायाः महत्त्वविषये किं लेखनीयम् ! सर्वेषां विदितमेव संस्कृतज्ञानाम् । ये संस्कृतं न जानन्ति न च ज्ञातुमिच्छन्ति तेषां समक्षं महत्त्व-वर्णनम् अरण्यरोदनमेव ! भौतिकवादिनि अस्मिन् युगे केलवम् अर्थस्य प्राधान्यम् । **"यस्यार्थस्तस्य मित्राणि, यस्यार्थस्तस्य बान्धवाः यस्यार्थः स पुमान् लोके"** इति मन्यमाना जनाः केवलमर्थार्थमेव परिभ्रमन्ति, यतन्ते च येन केनाप्युपायेन अर्थमर्जितुम् । अर्थार्थमेव भ्रष्टाचारः, अर्थार्थमेव तस्करत्वम्, सर्वेषाम् अर्थार्थमेव इतस्ततः प्रधावनम् । अर्थाद् ऋते नास्ति किमपि चिन्तनम्।

एतादृशेऽर्थप्रधाने वातावरणे संस्कृतस्य चिन्ता केन क्रियेत । अनर्थकरीति त्यज्यते दूरत एव संस्कृतभाषा । सर्वे तामेव भाषां पठन्ति, तामेव कलामभ्यसन्ति यया जीवनं सार्थकं भवति । मन्ये, अर्थमेव समवेक्ष्य आङ्गलभाषाविद्भिः पृथिव्याः पर्यायः "अर्थ" इति कृतः । अत एव साम्प्रतिकाः जना अर्थेन (पृथिव्या) अर्थं संयोजयन्ति । वस्तुतः सांसारिकजीवनम् अर्थेन विना न चलति । अशनम्, वसनम्, निवसनम् इत्येतत्त्रयं मौलिकरूपेणावश्यकम् । त्रयस्यास्य कृते सर्वेषां प्रयत्नः समीचीन एव । बुभुक्षितो जनः न किमपि कर्त्तुं शक्नोति । विज्ञानेन आविष्कृतानि सुखसाधनानि संयोजयितुं संस्कृतभाषा नार्हा इति मतिर्जनानाम् । अत्र नास्ति सर्वथाऽसत्यम् ।

अत्र चिन्तनीयं किञ्चित् । किं शरीरपोषणमेव जीवनस्य लक्ष्यम्? किं येन केनापि प्रकारेण जीवनयापनमेव मानवलक्ष्यम् ? एतत् कृत्यन्तु इतरे प्राणिनोऽपि कुर्वन्ति । वने पशवः अयत्नेनैव ससुखं विहरन्ति । मानवस्तु प्रयत्नं कुर्वाणोऽपि निश्चिन्तं जीवनं न यापयति । अहर्निशं विवर्धमानास्तस्यावश्य-कतास्तं सर्वदा नर्तयन्ति । एकस्या आवश्यकताया पूर्तौ अन्या आवश्यकताः मुखं व्यादाय सम्मुखमायान्ति । सर्वं जीवनं सङ्घर्षमयं जायते । एवमेव नर्तनं कुर्वन्तः पशुवत् जीवनं यापयन्तः जनाः रिक्तहस्ता एव संसारादपयान्ति । नैव जानन्ति ते मानवजीवनस्य लक्ष्यम्, परिचीयते तैः स्वकृत्यजातम्, निरर्थकमेव याति तेषां दुर्लभ्यं मानवजीवनम् । एतादृशेभ्यः मानवेभ्यः केषाञ्चित् पशूनां

जीवनं श्रेयः । संस्कृतमधीतवन्तः सर्वेऽपि मानवजीवनलक्ष्यं जानीयुरिति नावश्यकम् । **'शास्त्राण्यधीत्यापि भवन्ति मूर्खा'** लोकोक्तिरियं नो निरर्था। वस्तुतः पल्लवग्राहित्वमेव दोषावहम् । कस्यापि विषयस्य यावत् तलस्पर्शि ज्ञानं न स्यात् तावत् तत्त्वं तस्य न ज्ञायते । संस्कृतभाषायामनेके विषयाः सन्ति, विषयाणाञ्च नैकाः शाखाः। महाभाष्ये कथितम् - **'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।'** महर्षेः वाक्यं श्रद्धेयम् । एकस्य शब्दस्य महिमा एतादृशः, तर्हि एकस्य शास्त्रस्य महिमा कीदृशः स्यात् ? महर्षिपतञ्जलिनोक्ते वाक्ये प्रत्येकं शब्दः महत्त्वपूर्णः । स कथयति .... स्वर्ग लोके च कामधुग् । न केवलं स्वर्गे, लोकेऽपि च कामधुग् । यथैव एकः शंब्दः तथैव एकं शास्त्रम् ।

संस्कृतज्ञेषु एका कुप्रवृत्तिर्दृश्यते, तस्या उद्घाटनं नानुचितं स्यात् । शास्त्रार्थप्रवृत्तिः पुराकालादेव प्रवर्तते । शास्त्रार्थः यदि ज्ञानवर्धनाय भवेत्तदा न कापि हानिः, श्रेयस्करः सः । किन्तु शास्त्रार्थः अन्यान् तिरस्कर्तुं स्वयञ्च पुरस्कर्तुं प्रयुज्यते तर्हि तेन ज्ञानावसरोऽवरुध्यते । पराजितानां हृदये हीनभावो जायते, विजेतृणाञ्च हृदि अहङ्कृतिः। उभयथा हानिः। न जानाति सर्वः सर्वम्। ये ज्ञानवन्तः, ते अन्यान् प्रोत्साहयेयुः **'परस्परं भावयन्तः श्रेयः परमवाप्नुयुः।'** अहङ्कृतिः ज्ञानस्य सीमां जनयति, सा ज्ञानमार्गमवरोधयति। एतस्याः प्रवृत्तेर्बाधः स्यात्, तदैव संस्कृत-विकासः।

सम्प्रति केचित् संस्कृतविद्वान्सः कवयश्च एतादृशाः सन्ति ये केवलमात्मनोऽभिनन्दनं वाञ्छन्ति। यशोलिप्सा बलवती सती तानुत्तेजयति। ते अहमहमिकया सम्मानमभिनन्दनञ्चेच्छन्ति प्रेरयन्ति च आयोजकान् स्वाभिनन्दनाय। स्वाभिनन्दनाय अर्थव्ययेऽपि सङ्कोचं न कुर्वन्ति। अभिनन्दनं भवेत् नात्र किञ्चिद् वक्तव्यम्, किन्तु तत्र लिप्सा नास्ति प्रशस्या। तस्यैवाभिनन्दनं श्रेयस्करं येन समाजस्योपकारः भवेत्।

संस्कृतभाषा ज्ञानविज्ञाननिधिः। किन्तु **'यस्तु क्रियावान् पुरुषः स विद्वान्'** शास्त्रेषु यज्ज्ञानं दृश्यते, तस्य अवतरणम् अस्माकं चेज्जीवने स्यात् तर्हि जीवनस्य साफल्यम्, संस्कृतस्य लोकोपकारकत्वम्। तादृशानां चरित्रवतां जीवनं विलोक्य अन्येऽपि संस्कृताध्ययनं प्रति रुचिमन्तः स्युः। संस्कृतभाषा एव मानवजीवनस्य लक्ष्यं बोधयति नान्या काचित्।

देववाणी-परिषद्वार्ता

(१) षड्विंशः स्थापनादिवससमारोहः

'देववाणी-परिषद्, दिल्ली'ति संस्थायाः षड्विंशः स्थापना दिवससमारोहः १३-१२-२००१ तारिकायां **'दिल्ली संस्कृत अकादमी'**-सभागारे सोत्साहं सम्मानितोऽभूत्। अवसरेऽस्मिन् परिषदस्त्रैमासिकपत्रस्य **'अर्वाचीनसंस्कृतस्य'** सप्ताहावधिका प्रदर्शनी अप्यायोजिताभूत् । यस्या उद्घाटनं मुख्यातिथिना गुरुकुलकांगड़ी-विश्वविद्यालयकुलपतिचरेण डॉ० सुभाषविद्यालंकारेण कृतम्। समारोहे परिषन्महासचिवेन किञ्च अर्वाचीनसंस्कृतप्रधानसम्पादकेन डॉ० रमाकान्त शुक्लेन भारतसर्वकारः दूरदर्शनतः दैनन्दिनसंस्कृतसमाचारप्रसारणार्थं प्रचोदित। समारोहस्याध्यक्षेण सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय-श्री कामेश्वरसिंह संस्कृतविश्वविद्यालययोः प्राक्तनकुलपतिना संस्कृतध्वनीनां प्रचारप्रसारयोरावश्यकता सविशेषमाकांक्षिता। समारोहे ब्रह्मर्षिराम-प्रपन्नाचायसंस्कृतमहाविद्यालयीयच्छात्राणां वेदपाठः श्रीजयप्रकाशस्य सुरभारती वन्दना मृडान्याः काव्यपाठ डॉ० बलदेवानन्दसागर- श्रीमधुरशास्त्रि-डॉ० इच्छाराम द्विवेद-अभिनवशुक्लैरभिभाषितम्। (चित्रं ८० तमे पृष्ठे)

(२) चतुर्दशः पण्डितराज-महोत्सवः

देववाणीः-परिषदा १.११.२००१ तारिकायां शरत्पूर्णिमायां चतुर्दशः पण्डितराज-महोत्सवः सम्मानितः । अस्मिन्नवसरे पण्डितराजजगन्नाथस्य पद्यानां पाठः 'छात्रबन्धु'-संस्थासदस्यैः श्रीदिनेशचतुर्वेदी-प्रभृतिभिः कृतः । श्री धर्मानन्द जोशिमहाभागेन पठितपद्यानामर्थो विशदीकृतः । परिषन्महासचिवेन पण्डितराजजगन्नाथस्य रचनानां विषयेऽभिभाषितम् । (चित्रं ८१ तमे पृष्ठे)

(३) अर्वाचीनसंस्कृतस्य त्रयोविंशवर्षपूर्तिः

उज्जयिन्यां १.१२.२००१ तारिकायां देववाणी-परिषदस्त्रैमासिकपत्रस्य **'अर्वाचीनसंस्कृत'**स्य त्रयोविंशपूर्त्यङ्कः परिषदोऽध्यक्षचरेण 'ज्ञानो'पाह्वेनाचार्य श्रीबच्चूलालावस्थिना औपचारिकतया समुन्मीलितः। परिषदः पूर्वाध्यक्षेण आचार्यश्री श्रीनिवासरथेन कार्यक्रमस्याध्यक्षता कृता। अवसरेऽस्मिन् पत्रस्य प्रधानसम्पादकेन डॉ० रमाकान्तशुक्लेन ज्ञापितं यदस्मिन्नंके विगतदशकद्वयतः देववाणी-परिषदा सम्बद्धस्य श्री०सुन्दरराजमहोदयस्य दीर्घा षड् रचनाः प्रकाशिता यत्र संवेदना- शिल्पदृशा बहूल्लेखनीयमस्ति। अस्मिन्नवसरे विक्रमविश्वविद्यालयस्य संस्कृत विभागाध्यक्षेण प्रो० केदारनारायणजोशिना, कालिदास-समिति-सचिवेन डॉ० केदारनाथशुक्लेन, प्रसिद्धसंस्कृतकविना डॉ० जनार्दनप्रसादपाण्डेयेन किञ्च सूरत-संस्कृतमण्डल-मन्त्रिणा श्रीरसिकलालपारिखमहाभागेन पत्रस्य प्रगतौ शुभकामना व्यक्ता तथा च समुन्मीलितेऽङ्के स्वहस्ताक्षराणि कृतानि। देववाणी-परिषत्सहसचिवेन किञ्च अर्वाचीनसंस्कृतस्य परामर्शदातृमण्डलसदस्येन डॉ० इच्छाराममद्विवेदिना धन्यवादज्ञापनं कृतम्। (अ.शु.)

संस्कृतजगद्वार्ता

(१) दिल्ली संस्कृत अकादमी

दिल्ली संस्कृत अकादम्या अग्रे लिखिताः उत्सवाः कोष्ठांकितेषु दिनांकेषु महता समारोहेण समायोजिता यत्र श्री कुलानन्द भारती, रमाकान्त गोस्वामी, श्री नरेश गौड़ः, प्रो० वें० कुटुम्ब शास्त्री, डॉ० के० पी० ए० मेननः, डॉ० अवनीन्द्र कुमारः, डॉ० शक्ति कपूरः, डॉ० वेदवती ढींगरा, डॉ० इच्छाराम द्विवेदी, डॉ० रमाकान्त शुक्लस्तथा चानेके विद्वांस, कवयः नेतारोऽधिकारिणश्चोपस्थिता आसन्। अकादमीसचिवेन डॉ० श्रीकृष्णसेमवालेन सर्वेषामेव कार्यक्रमाणां संचालनं कृतम्–(१) 'छात्रबन्धु'-संस्थायाः सौजन्येन जनकपुर्यां संस्कृताध्यनकेन्द्रस्योद्घाटनम् (21.10.2001 चित्रं 82 तमे पृष्ठे) (2) शिक्षा निदेशालयस्य उत्तरपश्चिम 'अ' मण्डलस्य षड्दिवसीयसंस्कृतप्रतियोगितानामुद्घाटनसमारोहः (३-११-२००१), (३) कवेः साक्षात्कारः (कविः-डा० इच्छाराम द्विवेदी 'प्रणवः') (4.11.2001 चित्रं 82 तमे पृष्ठे), (4) शिक्षा निदेशालयस्य उत्तरमण्डलस्य षड्दिवसीयसंस्कृतप्रतियोगितानामुद्घाटनसमारोहः (५-११-२००१), (५) व्याकरणसूत्रान्त्याक्षरीप्रतियोगिता समारोहः (१०-११-२००१), (६) वेदमन्त्रान्त्याक्षरीप्रतियोगिता (१७-११-२००१), (७) महाविद्यालयीयश्लोक- संगीतप्रतियोगिता (२२-११-२००१), (८) महाविद्यालयीयसंस्कृतकाव्यालिप्रतियोगिता (७-१२-२००१), (९) महाविद्यालयीयसंस्कृतनाट्यसमारोहः (१३-१२-२००१), (१०) महाविद्यालयीयश्लोकान्त्याक्षरीप्रतियोगिता (१५-१२-२००१), (११) संस्कृतसंगीतकार्यशालाया उद्घाटनसमारोहः (२४-१२-२००१), (१२) कवेः साक्षात्कारः (कविः डॉ० प्रवेश सक्सेना) (३०-१२-२००१), (१३) संस्कृतिः, श्रीरवीन्द्रकाव्यकुसुमांजलिः (चतुर्थो भागः) संस्कृत-सम्मेलन-विवरणिका इत्येषां ग्रन्थानां लोकार्पणसमारोहः (३१-१२-२००१), (१४) योगायुर्वेदाध्ययन-केन्द्रोद्घाटनसमारोहः (५-१-२००२), (१५) केन्द्रीयसंस्कृतप्रतियोगितासमारोहः (१२-१-२००२), (१६) गणतन्त्रदिवसोपलक्ष्ये राष्ट्रियसंस्कृतकविसम्मेलनम् (१९-१-२००२), (१७) संस्कृतसूक्तिसमुच्चय (स्मृतिखण्ड) लोकार्पण समारोहः (२-२-२००२), (१८) कवेः साक्षात्कारः (कविः प्रो० वें० कुटुम्बशास्त्री) (२५-१-२००२), (१९) विद्यालयीयसंस्कृतनाट्यसमारोहः (९-२-२००२), (20-21) संस्कृतछात्रवृत्तिवितरणसमारोहः (19.2.2002, 22.2.2002)। अकादमी २६-२-२००२ तारिकायां 'संस्कृतसाहित्यसेवासम्मान समारोहम्' आयोजयति।

(२) मैनपुर्यां वेदभारतीसमारोहः

मैनपुरीस्थ-सुरभारतीसेवासंस्थानस्य उज्जयिनीस्थ-महर्षिसान्दीपनिराष्ट्रिय-वेदविद्याप्रतिष्ठानस्य संयुक्ततत्त्वावधाने मैनपुर्यां २८. २९. ३०-१२-२००१ तारिकासु वेदसंस्कृतिरक्षणोपक्रमे उत्तरक्षेत्रीयवैदिकसम्मेलनं (वेदभारतीसमारोहः) समायोज्यत यत्र पञ्चविंशतिप्रायैर्वैदिकविद्वद्भिर्वेदपाठः कृतः। उद्घाटनसमारोहे मुख्यातिथित्वं प्रो० राधावल्लभत्रिपाठिना, आध्यक्ष्यं डॉ० रमाकान्तशुक्लेन सञ्चालकत्वं च डा० इच्छारामद्विवेदिना निर्व्यूढम्। पं० राजपतिशुक्लस्याध्यक्ष्ये डा० रमाकान्तशक्लेन वेदविषयकं व्याख्यानं पं० वैकुण्ठनाथशर्म पं० वामनदेवभट्टाचार्यादीनां सहकारेण कृतम्। समारोहावसरे अ०भा० कविसम्मेलनस्य सांस्कृतिककार्यक्रमस्य चाप्यायोजनमभूत्। वैदिकविद्वदभिनन्दनेन समारोहोऽयं सम्पूर्णतां प्राप्तः।

(३) प्रो० ओम्प्रकाश पाण्डेयः राष्ट्रियवेदविद्याप्रतिष्ठानस्य नूतनः सचिवः

लक्ष्मणपुर (लखनऊ) विश्वविद्यालयस्य संस्कृताचार्यः प्रो० ओम्प्रकाशपाण्डेयः उज्जयिनीस्थमहर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिव-पदस्य कार्यभारं ४-१-२००२ तारिकायां जग्राह।

(४) मध्यप्रदेश-संस्कृत-अकादमी

म०प्र०सं० अकादेम्या १३-१५.११.२००१ तारिकायां चित्रकूटे 'तुलसी उत्सव रघुनाथगाथा' कार्यक्रम आयोजितः। अकादम्या १७ १९.२.२००२ तारिकासु ग्वालियरनगरे भवभूति-समारोहः (२००२) सम्मानितः यत्र विविधाः प्रतियोगिताः, नाट्यप्रस्तुतिः, शोधसत्रचतुष्टयं डबरानगरयात्रा च समायोज्यन्त।

(५) राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संस्थानेन ''राजीवगान्धी केन्द्रीय संस्कृत विद्यापीठम्, शृङ्गेरी (कर्णाटक)''-इत्यत्र २८-३०.१२.२००१ तारिकासु 'अखिलभारतीय-शास्त्रीय-संस्कृतभाषणस्पर्धा' समायोजिता यत्र व्याकरण-न्यायवैशेषिक-सांख्ययोग-वेदान्त-मीमांसा-साहित्य-धर्मशास्त्र-ज्यौतिष-विषयान् अवलम्ब्य प्रतियोगिभिरभिभाषितम्। अवसरेऽस्मिन् सांस्कृतकार्यक्रमस्य किञ्चान्त्याक्षर्या आयोजनमप्यभूत्।

संस्थानेन भोगीलाल लेहरचन्द प्राच्यविद्या शोधसंस्थानस्य संयुक्ततत्त्वावधाने 18.2.2002 तारिकायां हस्तलेखविज्ञान-शोधप्रविधि प्रशिक्षण पाठ्यक्रमस्योद्घाटनमायोजितम्।

(६) राष्ट्रपतिना विद्वांसः सम्मानिताः

६.२.२००२ तारिकायां राष्ट्रपतिभवने भारतस्य महामहिमराष्ट्रपतिना डा. के.आर.नारायणेन विगतवर्षत्रयाय संस्कृतपालिविद्वद्भ्यः सम्मानपत्राणि समर्पितानि।

(७) वार्षिकोत्सवः

बरेलीनगरे १६–१७.२.२००२ तारिकयोः श्रीटीबरीनाथसांगवेदसंस्कृत-महाविद्यालयस्य वार्षिकं वसन्तोत्सवं सामूहिकयज्ञोपवीतसंस्कारः एकांकिनाटकाभिनयः किञ्च सामूहिकगीतप्रस्तुतिः समायोज्यन्त।

(८) विद्यापीठस्य षष्ठदीक्षान्तसमारोहः

नवदिल्ल्यां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य षष्ठदीक्षान्तसमारोहः १७.२.२००२ (माघ शुक्लपञ्चम्यां, वि० २०५८) तारिकायामायोज्यत यत्र विश्वविद्यालयानुदानायोगाध्यक्षेण डॉ० हरिगौतमेन दीक्षान्तभाषणं कृतम्। सारस्वतातिथिः प्रो० रमारञ्जनमुखर्जी पुरस्कारवितरणमकरोत्। विद्यापीठकुलाधिपतिः न्यायमूर्तिः श्री पी०एन० भगवती आध्यक्ष्यमकरोत्।

षष्ठदीक्षान्तसमारोहावसरे ११ १७.२.२००२ तारिकासु **'सप्तवर्णी'** नाम्ना सप्ताहावधिकः कार्यक्रमः समायोजितोऽभूत् यत्र सारस्वतेष्टिः, विविधा व्याख्यानमालाः, युवसमारोहः, शास्त्रचर्चापरिषद्, कविसमवायः, नाट्यसमारोह इत्येतेषामायोजनमभूत्। अवसरेऽस्मिन् विद्यापीठस्याद्यकुलपतेः 'पद्मश्री' डॉ० मण्डनमिश्रस्य स्मृतौ विद्यापीठग्रन्थालयः समर्पितोऽभूत्। विद्यापीठस्य पुराणेतिहासविभागेन डा. इच्छारामद्विवेदिनः प्रधानसम्पादकत्वेन प्रवर्तितायाः **'पुराणपीयूषम्'** इत्येतन्नाम्न्या वार्षिकपत्रिकायाः लोकार्पणमभूत् । विद्यापीठकुलपतिः प्रो० वाचस्पतिउपाध्यायः सपरिकरः सर्वेषु कार्यक्रमेषूपस्थित आसीत्।

(९) बलदेवानन्दसागराय पीएच०डी०

श्रीलालबहादुरशास्त्रिविद्यापीठस्य षष्ठे दीक्षान्तसमारोहे शोधोपाधिं प्राप्तवत्सु आकाशवाणीदूरदर्शनवार्ताप्रसारकः श्रीबलदेवानन्दसागरोऽप्यन्यतमः। श्रीसागरेण डॉ० रवीन्द्रनागस्य निर्देशने कर्मकाण्डे स्तुतीनां महत्त्वमवलम्ब्य स्वशोधकार्यं कृतम्।

(१०) संस्कृत पोर्टलस्य प्रवर्तनम्

नवदिल्ल्याम् '३१-३२ बेगमपुर-पार्कः, शिवालिकः, मालवीयनगरम्, नवदेहली-११००१७' इत्यत्र वसन्तपञ्चमीदिने १७-२-२००२ तारिकायां 'नेट्जाल.काम्(www.netjaal.com)' संस्थायास्तत्त्वावधाने समायोजिते एकस्मिन् समारोहे श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठ कुलपतिः प्रो० वाचस्पतिउपाध्यायः **'संस्कृतपोर्टल'** मुद्घाटयत्। प्रो० सत्यव्रतशास्त्रिणा आध्यक्ष्यं कृतम्। 'नेट्जाल्.काम्'-सम्पादकीयनिदेशकेन डॉ० वेदप्रतापवैदिकेन सूचितं यदितः परं जिज्ञासवः http://sanskrit.netjaal.com इतिमाध्यमेन

संस्कृतपोर्टले प्रवेष्टुं द्रष्टुं च शक्ष्यन्ति। अस्मिन्नवसरे डॉ० बलदेवानन्दसागर-डॉ० रामप्रकाशदास-प्रभृतयोऽनेके संस्कृतज्ञाः संस्कृतानुरागिणश्चोपस्थिता आसन्।

(११) कवेः साक्षात्कारः

दिल्ली संस्कृत अकादम्या '**कवेः साक्षात्कारः**' इत्येष कार्यक्रमः गतवर्षे प्रवर्तित आसीत् यस्यारम्भो गतवर्षे संस्कृत कवेः डा० रमाकान्तशुक्लस्य साक्षात्कारेणाभवत्। ततः परं डॉ० रामकरणशर्मणः, ओम्प्रकाशठाकुरस्य, डॉ० कृष्णलालस्य, डॉ० सत्यव्रतशास्त्रिणश्च साक्षात्कारा आयोज्यन्त।

विगते ४-११-२००१ तमे दिनांके अकादम्या 'प्रणव' कवेः डॉ० इच्छारामद्विवेदिनः साक्षात्कारः । समायोजितः। अस्मिन् कार्यक्रमेऽध्यक्षरूपेण डॉ० रमाकान्तशुक्लः सम्प्राप्तः । अनेके संस्कृतविद्वांसः डॉ० द्विवेदिनो विषये प्रश्नानकुर्वन् येषामुत्तरं तेन प्रदत्तम्। 'प्रणव' कविना स्वरचना अपि सस्वरं पठिताः याभिः सभानुरञ्जिता बभूव।

३०-१२-२००१ तारिकायां डॉ० प्रवेशसक्सेनायाः साक्षात्कारः समायोजितोऽभूत् यत्र तया स्वरचनानां पाठोऽक्रियत किञ्च श्रोतॄणां प्रश्नानामुत्तराण्यदीयन्त।

२५-१-२००२ तारिकायां राष्ट्रियसंस्कृतसंस्थानसंगोष्ठी-सभागारे प्रो० वें० कुटुम्बशास्त्रिणः साक्षात्कारः समायोजितोऽभूत् यत्र प्रो० शास्त्रिणा स्वजीवनस्य रोचकः परिचयोऽदायि किञ्च स्व कवितासंकलनस्य '**वनमाला**' शीर्षकस्य अनेका रचनाः किञ्च काव्यानुवादाः श्राविताः।

(१२) प्रो० सत्यव्रतशास्त्रिणे 'श्रीवाणी'-अलंकरणम्

रामकृष्ण-जयदयाल-डालमिया-श्रीवाणी-न्यासेन संकल्पितः '**रामकृष्ण-जयदयाल-डालमिया-श्रीवाणी-अलंकरणम्**' नामकः २००१-ख्रिस्ताब्दस्य अष्टमः पुरस्कारः ७१-वर्षीयाय पद्मश्री डॉ० सत्यव्रतशास्त्रिमहोदयाय (श्रीजगन्नाथसंस्कृत-विश्वविद्यालयस्य पूर्व-कुलपतिमहाभागाय) उद्घोषितः। एष पुरस्कारः एतस्य विदुषः प्रकाशितान् समस्त-संस्कृत-ग्रन्थान्, विशेषतया 'रामकीर्तिमहाकाव्यम्' इति ग्रन्थभिलक्ष्य प्रदेयः अस्ति। पुरस्कारस्य राशिः लक्षद्वय-रूप्यक-मितः वर्तते। एतेन सह प्रशस्तिपत्रं, श्रीवाणी-प्रतिमा मंगलवस्त्रं, श्रीफलं चापि समर्पयिष्यन्ते। पुरस्कार एष २७-२-२००२ तारिकायां नवदिल्ली-नगरे आयोज्यमाने समर्पयिष्यते।

(१३) संस्कृते वैवाहिकनिमन्त्रणपत्रम्

असमप्रान्तीयेन श्रीगोकुलेन्द्रनारायणदेवगोस्वामिना स्वविवाहस्य किञ्च वाराणसीस्थेन डा. कपिलदेवपाण्डेयेन स्वपुत्रस्य चि. विवेकस्य विवाहस्य निमन्त्रणपत्रम् संस्कृतभाषायां मुद्रापितमेतदर्थंभुभौ अभिनन्दनानि अर्हतः।

(१४) प्रो० मुहम्मद इसराइल खानस्यामिनन्दनम्

११.१.२००२ तारिकायां दिल्लीविश्वविद्यालयस्य दक्षिणपरिसरे प्रो० मुहम्मद इसराइलखानमहोदयस्य राष्ट्रपतिसम्मानलाभार्थमभिनन्दनमभूत् । अस्मिन्नवसरे सर्वे विभागाचार्या उपस्थिता आसन् । प्रो० खानः स्वलेखमाध्यमेन प्रत्यपीपदत् यत् वेदानां रामायणस्य चाध्ययनेन सामाजिक-समरसताया भ्रातृत्वस्य च भावना पुष्यते । (अभिनवः शुक्लः)

मान्यवर्येभ्यः पण्डितवर्येभ्यः कविसत्तमेभ्यः डॉ० श्रीरमाकान्तशुक्लमहोदयेभ्यः सविनयादरं नमोनमः।

प्रियमान्याः, अद्यैव प्राप्तोऽर्वाचीनसंस्कृतस्य त्रयोविंशवर्षस्य चतुर्थाङ्कः। तत्र कविवर्याणां श्रीसुन्दरराजमहोदयानां काव्यानि रसपूर्णानि पठित्वा बहु सन्तोषो जातः। .. .. .. अद्याहं श्रीमत्सेवायामेकं प्रासंगिकं काव्यं भारतीयसंसद्भवनोपरि सञ्जाताक्रमणमधिकृत्य लिखितं प्रेषयापि। तदर्वाचीनसंस्कृते प्रकाश्यानुग्रहं कुर्वन्तु तत्रभवन्तः। अन्यदेकं वृहत्काव्यं १३० शा०वि० श्लोकात्मकं अमेरिकोपरिसञ्जाताक्रमणमधिकृत्यापि लिखितं "अम्रीकोपर्यातङ्कवादाक्रमणं" नाम.......।

१०-१-२००२ —हरिश्चन्द्ररेणापुरकरः, गुलबर्गा

देववाणी-परिषदः षड्विंशे स्थापनादिवससमारोहे (वामतो दक्षिणं) सर्वश्री अभिनवः शुक्लः, डॉ० इच्छारामद्विवेदी 'प्रणवः', कविरत्न डॉ० श्रीकृष्णसेमवालः, प्रो० रामकरण शर्मा, डॉ० सुभाष विद्यालंकारः, श्री मधुर शास्त्री, डॉ० रमाकान्त शुक्लश्च (भाषमाणः) १३.१२.२००१

देववाणी-परिषदा 1-11-2001 तारिकायां समायोजिते चतुर्दशतमे पण्डितराजसमारोहे भाषमाणः परिषन्महासचिवः डॉ० रमाकान्त शुक्लः ।



छात्रयन्धुसंस्थायाः सचिवः श्री दिनेशचन्द्र चतुर्वेदी पण्डितराजजगन्नाथस्य श्लोकान् पठति ।
(1-11-2001)

दिल्ली संस्कृत अकादम्या छात्रबन्धु-संस्थायाः सौजन्येन 21-10-2001 तारिकायां संस्कृताध्ययनकेन्द्रमुद्घाटितम् । केन्द्रस्योद्घाटनसमारोहे (वामतो दक्षिणं) विशिष्टातिथिः श्री कृष्णदत्त शास्त्री, समारोहाध्यक्षः डॉ० रमाकान्त शुक्लः, विशिष्टातिथिः प्रो० जगदीशप्रसाद सेमवालः, प्रो० उमेशचन्द्र पाण्डेयः, अकादमीसचिवः डा० श्रीकृष्ण सेमवालश्च ।

दिल्ली संस्कृत अकादम्या 4-11-2001 तारिकायां समायोजिते 'कवेः साक्षात्कारः' इत्यस्मिन् कार्यक्रमे (वामतो दक्षिणं) साक्षात्करणीयः कविः डॉ० इच्छाराम द्विवेदी 'प्रणवः', कार्यक्रमाध्यक्षः डॉ० रमाकान्त शुक्लः, मुख्यातिथिः डॉ० के.पी.ए. मेननः अकादमी सचिवः डॉ० श्रीकृष्ण सेमवालश्च ।

परामर्शदातृ–मण्डलम्

१. आचार्य श्रीनिवास रथ:
२. "अभिराज" डा० राजेन्द्र मिश्र:
३. डा० उमाकान्त शुक्ल:
४. डा० विष्णुकान्त शुक्ल:
५. डा० भास्कराचार्य त्रिपाठी
६. डा० इच्छाराम द्विवेदी "प्रणव:"

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००.०० प्रतिपृष्ठम्
इतरपृष्ठस्य	१०००.०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००.००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम् (२००१त: प्रभावि)

संस्थानां कृते	वार्षिकं (भारते) रु० १००.००
	वार्षिकं (विदेशेषु) यू०एस० डालरा: १५
	आजीवनं (भारते) रु० ८००.००
	आजीवनं (विदेशेषु) यू०एस० डालरा: १५०
व्यक्तीनां कृते	वार्षिकं (भारते) रु० ५०.००
	वार्षिकं (विदेशेषु) यू एस० डालरा: १५
	आजीवनं (भारते) रु० ५००.००
	आजीवनं (विदेशेषु) यू०एस० डालरा: १५०
डाकव्यय:	यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यंका: प्रेष्येरन्,
	भारते रु० ८०.००
	विदेशेषु यू०एस० डालरा: ४०

विगतांकानां (Back Volumes) प्रतिवर्षम् मूल्यम् रु० १०० /— २० डालरा वा/

देववाणी–परिषद: सदस्यानां सभासदां च कृते पत्रं नि:शुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देय: स्यात् । ग्राहका: ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) इत्यंकितेन दिल्ल्यां/नवदिल्ल्यां प्रदेयेन बैंकड्राफ्टेन/धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :—

सम्पादक:
अर्वाचीनसंस्कृतम्
देववाणी–परिषद्, दिल्ली
आर–६, वाणी–विहार:, नयी दिल्ली–११००५९ (भारतम्)

देववाणी-परिषदा प्रकाशिता: केचन ग्रन्था:

ग्रन्थांक:	ग्रन्थ: लेखक:	मूल्यम्
23.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपाद:)	रु० 150.00
28.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० 150.00
29.	साहित्यकौतुकम् (पं० टी०वी० परमेश्वर अय्यर:)	रु० 150.00
32.	श्रीबदरीशसुप्रभातम् (डा० सी०आर स्वामिनाथन्)	रु० 10.00
42.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्ल:)	रु० 10.00
44.	रसदर्शनम् (डा० रमेशचन्द्र शुक्ल:)	रु० 150.00
45.	संस्कृत साहित्य में राष्ट्रिय-भावना (डा०हरिनारायण दीक्षित)	रु० 400.00
47.	भाति मौरीशसम् (डा० रमाकान्त शुक्ल:)	रु० 10.00
49.	कूहा (काव्यम्) (डा० उमाकान्त शुक्ल:)	रु० 60.00
53.	सारस्वतसमुन्मेष: (डा० विन्ध्येश्वरीप्रसाद मिश्र 'विनय:')	रु० 60.00
59.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्री त्रिगुणानन्द शुक्ल)	रु० 150.00
64.	लक्ष्मीशतकम् (डा० वरदाचार्य कण्णन्)	रु० 60.00
65.	ऋतम् (उपन्यास:) (डा० केशवचन्द्र दाश:)	रु० 60.00
72.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० 150.00
74.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० 60.00
75.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्ल:)	रु० 110.00
81.	नाट्यसप्तकम् (नाटकम्) (डा० रमाकान्त शुक्ल:)	रु० 200.00
82.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्ल:)	रु० 30.00
83.	श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी (श्री श्री०सुन्दरराज:)	रु० 10.00
84.	भारतजनताहम् (कवितासंग्रह: यन्त्रस्थ:)(डा० रमाकान्तशुक्ल:)	रु० 200.00
85.	सत्येरणानाटकम् (डा० इच्छाराम द्विवेदी 'प्रणव:')	रु० 100.00
86.	निस्यन्दिनी(संस्कृतगीतसंग्रह:)(डा० जनार्दनप्रसाद पाण्डेय:'मणि:')	रु० 100.00
87.	श्रीजगन्नाथसुप्रभातम् तथा अन्यानि स्तोत्राणि (श्री० सुन्दरराज:)	रु० 50.00
88.	कवितावलि:(अनुवादकाव्यम्)(डा० प्रेमनारायण द्विवेदी)	रु० 100.00

देववाणी-परिषद्, दिल्ली आर-6 वाणी विहार:, नई दिल्ली-110059 फोन : 5639146

"देववाणी-परिषद्, दिल्ली"-कृते डा० रमाकान्तशुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर-६, वाणी विहार:, नई दिल्ली-११००५९" त: प्रकाशितम्-अर्वाचीनसंस्कृतम् (२४/१) प्रधानसम्पादक: डा० रमाकान्त शुक्ल: । प्रकाशनतिथि: २५-२-२००२
अस्यांकस्य मूल्यम् रु० २५-०० Rs. 25.00